This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

Checked 23

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 815 विषय धर्मशास्त्र
नाव. रत्नावली (तिथी निर्णय) mss.
लेखक/लिपीकार रमानाथ विठ्ठलरचित, बापु विठ्ठु खोडे (लिपिक)
पृष्ठ 49 काळ शके 1748 पूर्ण/अपूर्ण

॥ लग्नरत्नावली निर्णयपुस्तक बापूखोंडस्य॥

कृत्यर
॥१॥

श्रीगणेशाय नमः ॥ नमस्कृत्य रमानाथं भट्टविठ्ठलसूनुना ॥ कृत्यरत्नावली रम्या तन्यते विदुषां मुदे ॥ तत्र चैत्रशुक्लप्रतिपदि संवत्सरारंभविधिस्तत्र प्रतिपदौदयिकी ग्राह्या ॥ चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ॥ शुक्लपक्षे समग्रं तु तदा सूर्योदये सति ॥ इति ब्रह्मपुराणात् ॥ दिनद्वये तद्व्याप्तौ तदव्याप्तौ वा पूर्वैव ॥ वत्सरादौ वसंतादौ बलिराज्ये तथैव च ॥ पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैरिति वृद्धवसिष्ठोक्तेः ॥ अस्य मलमासत्वे तत्रैव संवत्सरारंभः ॥ तस्या एव संवत्सराधिपतित्वात् ॥ अत्र तैलाभ्यंगो नित्यः ॥ वत्सरादौ वसंतादौ बलिराज्ये तथैव च ॥ तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यत इति वृद्धवसिष्ठोक्तेः ॥ ॥ अत्रैव नववर्षारंभः ॥ मलमासे तूत्कर्षः ॥ अत्र प्रपादानमुक्तं भविष्ये ॥ अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे ॥ पुण्येऽह्नि विप्रकथिते प्रपादानं समारभेदिति ॥ तत्र मंत्रः ॥ प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता ॥ अस्य प्रदानात्पितरः तृप्यंतु हि पितामहाः ॥ इति तत्रैव ॥ अनिवार्य

॥१॥
त्नावली

स्ततो देयं जलं मासचतुष्टयमिति ॥ तथा ॥ प्रपां दातुमशक्तेन विशेषाद्धर्ममीप्सुना ॥ प्रत्यहं धर्मघटो वस्त्रसंवेष्टिताननः ॥ ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः ॥ तत्र मंत्रः ॥ एष धर्मघटो दत्तो ब्रह्माविष्णुशिवात्मकः ॥ अस्य प्रदानात्सकला मम संतु मनोरथाः ॥ इति तत्रैव ॥ अनेन विधिना यस्तु धर्मकुंभं प्रयच्छति ॥ प्रपादानफलं सोऽपि प्राप्नोतीह न संशय इति ॥ चैत्रशुक्लतृतीयायामीश्वरयुतां गौरीं समभ्यर्च्य दोलयेत् ॥ तथा च देवीपुराणे ॥ तृतीयायां यजेद्देवीं शंकरेण समन्वितां ॥ कुंकुमागरुकर्पूरमणिवस्त्रसुगंधकैः ॥ स्रग्गंधधूपदीपैश्च दमनेन विशेषतः ॥ आंदोलयेत्ततो वत्स शिवोमातुष्टये सदा ॥ रात्रौ जागरणं कार्यं प्रातर्देयाच्च दक्षिणा ॥ हेमवस्त्रान्नपानादि तांबूलानि द्विजस्तथेति ॥ मूर्तिस्वरूपमुक्तं देवीपुराणे ॥ सौवर्णस्तु उमा कार्या राजतः शंकरस्तथा ॥ चतुर्भुजस्तु देवेशो द्विभुजा तु उमा भवेदिति ॥ इयं मुहूर्तमात्रापि परा ग्राह्या ॥ गौ

स्मृत्य०
॥२३॥

री दैवसत्वात्॥ इयं पंचम्यादिः॥ शुक्लपक्षगतत्वात्कुतुपस्पर्शव्यापिनी ग्राह्या॥ हेमाद्रिस्तु॥
पूर्वाण्हे तु सदा ग्राह्याः शुक्ला मन्वादियुगादयः॥ दैवे कर्मणि पित्र्ये च स्युर्वेधा पराण्हिके इति निग
मवचनात्सौर्वाण्हिकी ग्राह्येत्याह॥ अत्र श्राद्धमुक्तं मात्स्ये॥ एतं श्राद्धं विधानेन मन्वादिषु यु
गादिषु॥ हायनानां द्विसाहस्रं पितृणां तृप्तिदं भवेदिति॥ अधिकमासेपीदं कर्त्तव्यं॥ मन्वा
दिकं तैर्थिकं च कुर्यान्मासद्वये पि चेति स्मृतिचंद्रिकोक्तेः॥ अत्र पिंडदानं नास्ति॥ तथा च का
र्ष्णिः॥ विषुवायनसंक्रांतिमन्वादिषु युगादिषु॥ विहाय पिंडनिर्वापं सर्वं श्राद्धं समाचरेदि
ति॥ एतदकरणे प्रायश्चित्तमुक्तं मन्वादिविधाने॥ तां भुवः प्रतिमंत्रं च शतवारं जले जपेत्॥ मन्वा
द्यो पदान्यमनाः कुरुते नैव वा यदीति॥ एवं षण्णवतिश्राद्धान्यपि नित्यानि॥ तेषामयं सं
ग्रहः॥ अमा १२ मनु १४ युग ४ क्रांति १२ धृति १३ पात १२ महालयाः १५ अन्वष्टक्यं च पू
र्वेद्युः षण्णवत्योष्टकात्रयेति॥ एवं मिलित्वा षण्णवति ९६ श्राद्धानि भवंति॥ चैत्रशुक्ल

॥२३॥
र लो०

तृतीयामत्स्यजयंती॥ चैत्रशुक्लपंचमीत्यन्ये॥ आषाढशुक्लैकादशीत्यपरे॥ इयं मध्या
ह्नव्यापिनी ग्राह्या॥ तदुपासकानां नित्या॥ अन्येषां काम्या॥ चैत्रशुक्लपंचमी कल्पादिः॥
अत्र स्नानादि महाफलं॥ अस्यामेव श्रीपूजा॥ हेमाद्रौ विष्णुधर्मोत्तरे॥ शुक्लपक्षस्य
पंचम्यां पूजयित्वा तथा श्रियं॥ सहदेवामुयान्नित्यसकलं संवत्सरोद्भवमिति॥ चैत्रशुक्ला
ष्टम्यां भवान्युत्पत्तिः॥ अत्र भवानीयात्रोक्ता काशीखंडे॥ भवानीं यस्तु पश्येत शु
क्लाष्टम्यां मधौ नरः॥ न जातु शोकं लभते सदानंदमयो भवेदिति॥ तत्रैवाशोककलि
काप्राशनमुक्तं लैंगे॥ अशोककलिकाश्चाष्टौ ये पिबंति पुनर्वसौ॥ चैत्रे मासि सि
ताष्टम्यां न ते शोकमवाप्नुयुः॥ पुनर्वसुयोगो नावश्यकः॥ किंतु प्राशस्त्यार्थः॥
तिथिः शारीरं देवस्य तिथौ नक्षत्रमाश्रितं॥ तस्मात्तिथिं प्रशंसंति न नक्षत्रं तिथिं विनेति
ज्योतिःशास्त्रात्॥ प्राशनमंत्रस्तु॥ त्वमशोक हराभीष्ट मधुमाससमुद्भव॥ पिबामि शो
कसंतप्तो मामशोकं सदा कुरु इति॥ विष्णुः॥ पुनर्वसुबुधोपेता चैत्रे मासि सिताष्टमी॥

व्रत
॥ ६॥

प्रातस्तु विधिना स्नात्वा वाजपेयफलं लभेद् इति ॥ चैत्रशुक्लनवमी रामनवमी ॥ सा तु मध्या-
ह्नयोगिनी ग्राह्या ॥ अगस्त्यसंहितायां ॥ चैत्रशुद्धे तु नवमी पुनर्वसुयुता यदि ॥ सैव मध्या-
ह्नयोगेन महापुण्यतमा भवेद् इति ॥ दिनद्वये तादृश्यां विपुनर्वसुयुता ग्राह्या ॥ तादृश्यपि दि-
नद्वये चेत्तदा परा ग्राह्या ॥ नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैर् इत्यगस्त्यसंहितावचना-
त् ॥ इयं च तदुपासकानां नित्या ॥ काम्या तु सर्वेषां भवतीत्यन्यत्र विस्तरः ॥ अत्र मध्याह्ने पूजा ॥ रा-
त्रौ जागरणं ॥ परेद्युः प्रातः पायसहोमब्राह्मणभोजनं पारणादिवेति दिनद्वयात्मकं व्रतं कर्तव्यं ॥
इयं मलमासे न कार्या ॥ स्पष्टमासविशेषाख्या विहितं वर्जयेन्मल इति वचनात् ॥ संकल्पमंत्रः ॥ उपो-
ष्य नवमीं त्वद्य यामेष्वष्टसु राघव ॥ तेन प्रीतो भव त्वं भोः संसारात्त्राहि मां हरे इति ॥ अर्घ्यमंत्रस्तु ॥ दशा-
ननवधार्थाय धर्मसंरक्षणाय च ॥ राक्षसानां विनाशाय दैत्यानां निधनाय च ॥ परित्राणाय साधू-
नां जातो रामः स्वयं हरिः ॥ गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघेति ॥ प्रतिमादानमंत्रस्तु ॥ इमां स्वर्ण-
मयीं रामप्रतिमां समलंकृतां ॥ चित्रवस्त्रयुगच्छन्नां रामोऽहं राघवाय ते ॥ श्रीरामप्रीतये दास्ये तुष्टो भवतु
राघव इति ॥ इति दत्वा विधानेन दद्याद्दक्षिणां ध्रुवं ॥ ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशय इति ॥ चै-

॥ ६॥
रत्नो॰

त्रशुक्लैकादश्यां दोलोत्सवः उक्तो ब्राह्मे ॥ चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः ॥ आंदो-
लनीयो देवेशो सलक्ष्मीको महोत्सवैर् इति ॥ चैत्रशुक्लद्वादश्यां दमनोत्सवः ॥ द्वादश्यां चैत्रमासस्य
शुक्लायां दमनोत्सवः ॥ बोधायनादिभिः प्रोक्तः कर्तव्यः प्रतिवत्सरम् इति रामार्चनचंद्रिकोक्तेः ॥
अत्र पारणाहविद्धिहितं ॥ पारणाहे न लभ्येत द्वादशी कलयापि चेत् ॥ तदा त्रयोदशी ग्राह्या प-
वित्रदमनार्पणे इति तत्रैवोक्तेः ॥ निःस्वेवेदं ॥ छुर्जे व्रतमधो दोलां श्रावणे तंतुपूजनं ॥ चैत्रे च द-
नारोपमकुर्वाणो व्रजत्यधः इति प्रमुखेणात् ॥ इदं शुक्रास्तादावपि कार्यं ॥ उपाकर्मोत्सर्जनं च पवि-
त्रदमनार्पणं ॥ ईशानस्यैव हि विष्णोः शयनं परिवर्तनं ॥ कुर्याच्छुक्रस्य गुरोर्मौढ्येऽपीति विनि-
श्चय इति वृद्धगार्ग्यवचनात् ॥ चैत्रशुक्लत्रयोदश्यामनंगव्रतं ॥ तत्र परा ग्राह्या ॥ अस्यामेव द-
मनकेनानंगपूजोक्ता कूर्मपुराणे ॥ चैत्रशुक्लत्रयोदश्यां मदनं चंदनात्मकं ॥ कृत्वा संपूज्य यत्नेन वीजयेद्व्य-
जनेन च ॥ ततः संधुक्षितः कामः पुत्रपौत्रसमृद्धिद इति ॥ चैत्रशुक्लचतुर्दशी रात्रियोगिनी पूर्वा
ग्राह्या ॥ मृधोः श्रावणमासस्य शुक्लायां तु चतुर्दशी ॥ सा रात्रिव्यापिनी दिना स्याद् इति बोधायनवचनात् ॥
चैत्री पौर्णमासी सामान्यनिर्णयात् परैव ॥ अत्राबुरोपा विष्णुस्मृतौ ॥ चैत्री चित्रायुता चेत्स्यात्तस्यां चि-
त्रवस्त्रप्रदानेन सौभाग्यमाप्नोतीति ॥ तथा मात्स्ये ॥ मंदवार्के गुरौ वापि वारेष्वेतेषु चैत्रिकी ॥ तत्राश्व

कृत्य०
॥१४॥

मिथुनं पुण्यं स्नानं श्राद्धादिभिर्भवेत ॥ वापवीये ॥ संवत्सरकृतार्चायाः साफल्याय नरोऽखिलान्सु
रान् ॥ दमनेनार्चयेच्चैत्र्यां किंशिपेण सहाशिवं ॥ इत्यंवमनुवादिः ॥ चैत्र शुक्ल चतुर्दश्यां विशेषमा
ह पुलस्त्यः ॥ चैत्रे शुक्लचतुर्दश्यां यः स्नायाच्छिवसन्निधौ ॥ न प्रेतत्वमवाप्नोति गंगायां तु विशेषतः इति ॥
अत्र पूर्वा ग्राह्या शुक्लपक्षगतत्वात् ॥ ॥ इति श्रीतत्सदुपनामकभट्टरामचन्द्रविरचितायां कृत्यर
त्नावल्यां चैत्रकृत्यानि ॥ ॥ अथ वैशाखकृत्यानि ॥ ॥ चैत्रे चानुदिनं स्नानं तिलैश्च पितृतर्पणं ॥
दानं धर्मघटादीनां मधुसूदनपूजनं ॥ माधवे मासि कुर्वीत मधुसूदनतुष्टये ॥ अथ वैशाखस्ना
नं ॥ विष्णुस्मृतिपाद्मयोः ॥ तुलामकरमेषेषु प्रातःस्नानं विधीयते ॥ हविष्यं ब्रह्मचर्यं च महापातक
नाशनमिति ॥ अत्र सौरमासस्तूक्तः ॥ अन्यदपि पक्षद्वयमुक्तं ॥ पाद्मे ॥ मधुमासस्य शुक्लायामेका
दश्यामुपोषितः ॥ पंचदश्यां च वा वीर मेषसंक्रमणेऽपि वा ॥ वैशाखस्नाननियमं ब्राह्मणानामनु
ज्ञया ॥ मधुसूदनमभ्यर्च्य कुर्यात्संकल्पपूर्वकं ॥ तत्र मंत्रः ॥ वैशाखं सकलं मासं मेषसंक्रमणे रवेः ॥
प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः ॥ मधुहंतुः प्रसादेन ब्राह्मणानामनुग्रहात् ॥ निर्विघ्नमस्तु
मे पुण्यं वैशाखस्नानमन्वहं ॥ माधवे मेषगे भानौ मुरारे मधुसूदन ॥ प्रातःस्नानेन मे नाथ फलदो
भव पापहन्निति ॥ तीर्थनामापरिज्ञाने तत्रैव ॥ यदा न ज्ञायते नाम तस्य तीर्थस्य भो द्विजाः ॥ तदैवं संस्म

॥१४॥
रत्नाव०

१५

रणं कार्यं विष्णुतीर्थमिदं त्विति ॥ अत्र त्रिकालं विष्णुपूजा कार्या ॥ अश्वत्थमूले जलदानं चैत्रादितै
त्तिरीकं ॥ अशक्तस्य त्र्यहं कार्यं स्नानमुक्तं पाद्मे ॥ त्रयोदश्यां वैशाख्यां च दिनत्रयं ॥ अपि सम्यग्विधानेन
नारी वा पुरुषोऽपि वा ॥ प्रातः स्नातः सुनियतः सर्वपापैः प्रमुच्यते ॥ ब्रह्माण्डे वैशाखो मलमासस्तु सप
तिः शुक्लमासे पूर्णिमायां कर्तव्या ॥ वैशाख्यां विधिवत्स्नात्वा जपेद्ब्राह्मणान्स्त्रीन्वा तस्याः सर्वपापैः प्र
मुच्यते नात्र संशय इति ॥ ॥ वैशाखशुक्लतृतीया अक्षय्यतृतीया ॥ इयं गौरीव्रते उत्तरा कार्या ॥ श्री
कृतपरपूर्वविद्धव्यापिनी ॥ उदकुंभप्रदानं स्नानाद्यनंतं नरा ॥ इयं चैत्रे तायुगादिः ॥ भारते ॥ ग्रामनाथस्य ग॥
वाक्षयतिथयः स्नानसुमानवः ॥ स्नात्वा हुत्वा च जप्त्वा च कृत्वानंतफलं लभेत् इति ॥ केचित्तु वैशाखस्तुत ते
याय: पूर्वविद्धां करोति वै ॥ इयं देवानां प्रणितिके श्वापि तरर स्वधेति गोभिलवचनात् ॥ पूर्वाह्णे तु स
दा कार्याः शुक्ला मनुयुगादयः इति नारदवचनाच्च ॥ श्राद्धे पिंडवर्जिते व्यापिन्युत्तरा कार्येति वदंति ॥ उ
कालाहर्यां हिविद्धतावां अयुतौ च ॥ अपराह्णः पितृणां अपराह्णे तु पैतृकं ॥ अपराह्णे पितृक्रिये
त्यादिवचनैरपराह्णकालव्यापिन्यां कर्मणो यस्येति वाक्यादपराह्णव्यापिन्याम् एव श्राद्धे ग्राह्यता
ते ॥ इदं शुक्लस्य पूर्वाह्णव्यगतः पूर्वाह्णस्त्रावत्कुतपपरत्वाद्बहुपरः ॥ शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कु
र्यादिक्षण इत्येतद्वाक्यगतपूर्वाह्णश्राद्धवत् ॥ पूर्वलिखितगोभिलवचनेन तु नाकरं ॥ साकरं त्वेव
पितृद्देशेन क्रियमाणतर्पणादिविषयं व्याख्येयमित्यन्यत्र विस्तरः ॥ भविष्ये ॥ विना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत्य॰
ग॰प॰॥

विशुक्लपक्षेतु तृतीयायां तथैव च॥ गंगातोयेन रः स्नात्वा मुच्यते सर्वकिल्बिषैः॥ तस्यां कार्यो य
वैर्होमो यवैर्विष्णुं समर्चयेत्॥ यवान्दद्याद्द्विजातिभ्यः प्रयतः प्राशयेद्यवानिति॥ अत्र स्नानं विशेषात् वि
ष्ये मात्स्ये॥ उदकुंभान्सकनकान्सान्नान्सर्वरसैः सह॥ यवगोधूमचणकान्सक्तुदध्योदनं तथा॥ ग्रै
ष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यत इति॥ देवीपुराणे॥ तृतीयायां तु वैशाखे रोहिण्यर्क्षे प्रपूज्य
च॥ उदकुंभप्रदानेन शिवलोके महीयते॥ मंत्रस्तु॥ एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः॥ अ
स्य प्रदानात्तृप्यन्तु पितरोपि पितामहाः॥ गंधोदकतिलैर्मिश्रं सान्नं कुंभं फलान्वितं॥ पितृभ्यः संप्रदा
स्यामि अक्षय्यमुपतिष्ठत्विति॥ युगादिषु च त्रीभोजने प्रायश्चित्तमुक्तं विधाने॥ रात्रौ भुक्ते व्रतस
रे तु मन्वादिषु युगादिषु॥ अभिस्रवादि मंत्रे च जपहोमान्न पातकमिति दशावारमित्यर्थः॥ ए
मः॥ एतेषूपवासाः सलिलं येयुगादिनेषु तु॥ दास्यंते ब्राह्मणेभ्यस्तिलास्तेषां विज्ञेया महादयाः इति॥ उपवा
से रवौ॥ संक्रांतिव्यतीपातौ युगमन्वादयस्तथा॥ समस्ता उपवासे स्युर्दानादौ तिमास्यन्ताद्यस्यन
लाभदोषाद्धस्तत्स्नात॥ पलमासपाते तु युगादिविहितं श्राद्धकार्यं॥ मन्वादौ तु युगादौ तु तन्मो
सौरत्तयोरपीति मरीचिवचनात॥ अत्र सप्तद्रस्नानं महाफलमुक्तं सौरपुराणे॥ युगादौ तु न

ग॰प॰॥
कृत्यो॰

८ दि

रः स्नात्वा विधिवल्लवणोदधौ॥ गोसहस्रप्रदानस्य कुरुक्षेत्रे फलं च यत्॥ तत्फलं लभते मर्त्यो
र मिदानस्यव्ययमिति॥ इयमेव तृतीया परशुरामजयंती॥ सा च प्रदोषव्यापिनी ग्राह्या॥
तथा च भार्गवार्चनदीपिकायां स्कांदे॥ वैशाखस्य सिते पक्षे तृतीयायां पुनर्वसौ॥ निशायाः प्र
थमे यामे रामाख्यः समये हरिः॥ रेणुकायाः स्वयोगर्भादवतीर्णो विभुः स्वयमिति॥ दिनद्वये तद्व्या
प्तौ तत्कालःसमव्याप्तौ वा परा॥ अन्यथा पूर्वैव॥ तदुक्तं तत्रैव भविष्ये॥ शुक्लात्तृतीया वैशाखे शुद्धोपो
प्यादिनद्वये॥ निशायाः पूर्वयामे चेत्तदान्यत्र पूर्विकेति॥ वैशाखशुक्लसप्तम्यां गंगोत्पत्तिः॥
तदुक्तं पृथ्वीचंद्रोदये ब्राह्मे॥ वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी पुरा॥ क्रोधात्पीता पुन
स्त्यक्ता कर्णरंध्रात्तु दक्षिणात्॥ तां तत्र पूजयेद्देवीं गंगां गगनमेखलामिति॥ पंचशिरस्त्वारा
मध्याह्नव्यापिनी ग्राह्या॥ दिनद्वये तद्व्याप्तौ तदव्याप्तौ वा पूर्वैव पुण्या इति पद्मवाक्यात्॥ वैशा
खशुक्लदशम्यां योगविशेषमाह मात्स्ये॥ पंचाननस्थो गुरुरक्षमिपुत्रोपि बुधो रविः स्याद्यदि शुक्लकु
पक्षे॥ प्राशाभिधानाकरभेण युक्ता तिथिर्व्यतीपातरतीह योगः॥ अस्मिंस्तु गोभूमिहिरण्य
वस्त्रदानेन सर्वपरिहाय पापं॥ सुरत्वमिंद्रत्वमनामयत्वं प्रत्याधिपत्यं च लभते मनुष्यः इति॥ पंचा

पंचाननः सिंह॥ पारणाभिधा तिथिर्मोक्षदा॥ करभं हस्तनक्षत्रं॥ वैशाखस्य शुक्लचतुर्दशी नृसिंहज-
यंती॥ सा च प्रदोषव्यापिनी ग्राह्या॥ प्रदोषस्य कर्मकालत्वात्॥ तदुक्तं हेमाद्रौ नृसिंहपुराणे॥ वैशा-
खे शुक्लपक्षे तु चतुर्दश्यां निशामुखे॥ मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनं॥ वर्षे वर्षे तु कर्तव्यं म-
म संतुष्टिकारकमिति॥ दिनद्वये तद्व्याप्तावव्याप्तौ वा समव्याप्तौ च परा॥ विषमव्याप्तौ त्वधिकव्या-
प्तिमती॥ दिनद्वयेऽप्यव्याप्तौ गौणकालव्यापित्वात्पूर्वेति केचित्॥ मम तु तन्न प्रतिभाति॥ यत्र क-
र्मकालो दोषस्तत्रैव गौणकालविधानमस्ति॥ तत्र मुख्यकालव्याप्त्यभावे गौणकालव्याप्त्या निर्णयो न तु
सर्वत्र॥ युग्मादिवाक्यानामानर्थक्यप्रसंगात्॥ न चास्मिन्द्वये कर्मकालव्याप्तिपक्षे तस्य निर्णायि-
कत्वान्नानर्थक्यमिति वाच्यं॥ तत्रापि गौणकालव्याप्त्याधिक्येन निर्णयात्॥ तस्माद्दिनद्वयेऽपिष
व्याप्त्यभावे शुक्लपक्षगतत्वात्पूर्वेति॥ अस्यां व्रतसंकल्पः प्रातः प्रक्रमो मध्याह्ने पूजनं कर्तव्यं॥ त-
तो मध्याह्नवेलायां नद्यादौ विमले जले स्नात्वा पंचगव्यं परिधाय ततो वासो व्रतकर्म समारभेदिति
तत्रैवोक्तेः॥ तत्र मंत्रः॥ श्रीनृसिंह महोग्र त्वं दयां कृत्वा ममोपरि॥ अद्याहं च विधास्यामि व्रतं
निर्विघ्नतां नयेति॥ ततो मध्याह्ने नद्यादौ मृद्गोमयतिलामलकैः स्नात्वा गृहमागत्य गोमयेनोप

लिप्य दलं कृत्वा तत्र संस्थाप्य हैमीं पलतदर्धेन तदर्धार्धमितां प्रतिमां संस्थाप्य प्राणप्रतिष्ठां कृत्वा
आवाहनादि पुष्पांतरासनं तावत्स्नानं पंचामृतेन स्नापयित्वा गंधादिभिः पूजयेत्॥ तत्र मंत्राः॥ चंद-
नेन शीतलं दिव्यं चंद्रकुंकुममिश्रितं॥ ददामि तव तुष्ट्यर्थं नृसिंह परमेश्वर॥ इति चंदनमंत्रः॥ कालो-
[illegible]नि पुष्पाणि तुलस्यादीनि वै प्रभो॥ पूजयामि नृसिंह त्वां लक्ष्म्या सह नमोऽस्तु ते॥ इति पुष्पमं-
त्रः॥ कालागरुमयं धूपं सर्वदेवसुवल्लभं॥ करोमि ते महाविष्णो सर्वकामसमृद्धये॥ इति
धूपमंत्रः॥ दीपः पापहरः प्रोक्तस्तमोराशिविनाशनः॥ दीपेन लभ्यते तेजस्तस्माद्दीपं
ददामि ते॥ इति दीपमंत्रः॥ नैवेद्यं सुखदं चारु भक्ष्यभोज्यसमन्वितं॥ ददामि ते रमाकांत सर्वपा-
पक्षयं कुरु॥ इति नैवेद्यमंत्रः॥ नृसिंहाच्युत देवेश लक्ष्मीकांत जगत्पते॥ अनेनार्घ्यप्रदानेन
सफलाः स्युर्मनोरथाः॥ इत्यर्घ्यमंत्रः॥ पीतांबर महाबाहो प्रह्लादभयनाशन॥ यथाभूते-
नार्चनेनानेन यथोक्तफलदो भव॥ इति प्रार्थनामंत्रः॥ एवं पूजां विधाय जागरणादिकं कुर्यादिति॥
अस्यामेव योगविशेषेण प्राशस्त्यं तत्रैवोक्तं॥ स्वातीनक्षत्रयोगे शनिवारे महद्व्रतं॥ सिद्धियोग-
स्य संयोगे वणिजे करणे तथा॥ पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः॥ तथा॥ एतैर्योगैर्विनापि
स्यान्मद्दिनं पापनाशनं॥ तथा॥ सर्वेषामेव वर्णानामधिकारोऽस्ति मद्व्रते॥ तथा॥ विज्ञाय मद्दिनं य-

हस्य
॥३॥

स्तत्कं चयेत्सापघ्नन्नरः॥ सयाति नरकं घोरं यावच्चंद्रदिवाकरौ॥ अत एवेदं नित्यकाम्यमित्य
तु॥ वस्तुतस्तु॥ श्रीनृसिंहोपासकानामेव नित्यं॥ अन्येषां तु काम्यमेव॥ वैशाखशुक्लपौर्णमास्यां
[illegible]॥ वैशाखी कार्त्तिकी माघी तिथयोतीवपूजिताः॥ स्नानदानविहीनानाने
याः पांडुनंदनेति॥ इति वैशाखकृत्यानि॥ ज्येष्ठशुक्लतृतीयायां रंभाव्रतं॥ तथा च भविष्ये॥ भ
द्रे कुरुष्व पत्नीनरंभाख्यं व्रतमुत्तमं॥ ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परेति॥ इयं पूर्ववि
द्धा ग्राह्या॥ [illegible] तथा रंभा सावित्री वटपैतृकी॥ कृष्णाष्टमी च भूतान्तकर्तव्या संमुखी ति
थिरिति स्कांदोक्तेः॥ ज्येष्ठशुक्लचतुर्थ्यां गौरीव्रतं॥ ब्रह्मपुराणे॥ ज्येष्ठशुक्लचतुर्थ्यां तु जाता पू
र्वमुमा सती॥ तस्मात्सा तत्र संपूज्या स्त्रीभिः सौभाग्यवृद्धये॥ उपहारैश्च विविधैर्गंधैस्तन्त्यो
त्सवादिभिः॥ होमैः पयोभिर्वस्त्रैश्च फलपुष्पैः सुगंधिभिरिति॥ ज्येष्ठशुक्लदशम्यां दशहरा॥
तदुक्तं ब्रह्मभविष्ये॥ ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता॥ हरते दश पापानि तस्मा
द्दशहरा स्मृतेति॥ वाराहे तु गंगायां दशहरावचनमुक्तं॥ दशम्यां शुक्लपक्षे तु ज्येष्ठमासे कुजेहनि॥
अवतीर्णा यतः स्वर्गाद्धस्तर्क्षे च सरिद्वरा॥ हरते दश पापानि तस्माद्दशहरा स्मृता॥ तस्मा

॥३॥
रंलौ

द्गंगां स्नानं प्रकुर्वीत दाने चैव विशेषतः इति॥ स्कांदे तु दशयोगा उक्ताः॥ तद्यथा॥ ज्येष्ठे मासि सिते प
क्षे दशम्यां बुधहस्तयोः॥ गरानंदव्यतीपाते कन्याचंद्रे वृषे रवौ॥ दशयोगे नरः स्नात्वा सर्वपापैः
प्रमुच्यत इति॥ इह बुधभौमयोर्विकल्पः॥ इयं च [illegible] त्रयोगबाहुल्ये सा ग्राह्या॥ योगाधिक्ये प
र्वाधिकं स्यात्॥ गंगाया अभावे अन्यस्यां सरिति कार्यं॥ तथा च स्कांदे॥ यां कांचित्सरितं प्राप्य द
द्यात् दर्भतिलोदकं॥ मुच्यते दशभिः पापैः समहापातकैरपि॥ दश पापान्युक्तानि स्कांदे॥ अदत्ता
नामुपादानं हिंसा चैवाविधानतः॥ परदारोपसेवा च कायिकं त्रिविधं स्मृतं॥ पारुष्यमनृतं चैव पैशु
न्यं चापि सर्वशः॥ असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधं॥ परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनं॥
वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतमिति॥ अत्र विशेषः काशीखंडे॥ ज्येष्ठे मासि सिते पक्षे प्रारभ्य
प्रतिपत्तिथिं॥ दशाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः॥ एवं सर्वासु तिथिषु क्रमस्नायी नरोत्तमः॥
आशुक्लपक्षदशमीं प्रतिजन्माघमुच्यत इति॥ तथा॥ लिंगं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ॥ दश
जन्मार्जितैः पापैस्त्यज्यते नात्र संशय इति॥ मलमासपाते तु तत्रापि दशहरास्नानं कार्यं॥ पुनः शुद्धे भव
तीति अन्यत्र [illegible]॥ ज्येष्ठशुक्लैकादश्यां निर्जलैकादशीव्रतं॥ पद्मनारदीयस्कांदे॥ ज्येष्ठे मासि सिते प
क्षे एकादशी शुभा॥ निर्जलां समुपोष्यात्र जलकुंभान्सशर्करान्॥ प्रदाय विप्रमुख्येभ्यः सर्वपापैः
विनिर्जितः॥ विष्णुलोकमवाप्येह मोदते विष्णुसन्निधौ इति॥ ज्येष्ठपौर्णमास्यां सावित्रीव्रतं॥

घ२

पु०
॥१८॥

स्कांदे भविष्ययोः ॥ ज्येष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखस्तूपक्रम्य ॥ व्रतं त्रिरात्रमुद्दिश्य
दिवा रात्रं स्थिराभवत् ॥ इत्स्कांदे उपसंहृतं ॥ ज्येष्ठे मासि सिते पक्षे पौर्णिमायां व्रतं शुभं ॥ चीर्णं म- पुरा२
हाभक्त्या कथितं ते मयानघेति दाक्षिणात्या एवमेव कुर्वंति ॥ पाश्चात्या सादयस्क अमायामाचरंति ॥
उक्तं च निर्णयामृते भविष्ये ॥ अमायां च तथा ज्येष्ठे वटमूले महासती ॥ त्रिरात्रोपोषिता नारी विधिना-
नेन पूजयेत् ॥ अत्र स्कांदे त्रयोदश्यां नक्तं कुर्याज्जितेंद्रियः ॥ अयाचितं चतुर्दश्याममायां समुपो-
षणमिति ॥ एतदमायां विहितस्य भाद्रपौर्णिमायामिदमुक्तं ॥ अत्र पौर्णिमामावास्ये सर्वविद्धे ग्रा-
ह्ये ॥ भूतविद्धा न कर्तव्या अमावास्या च पौर्णिमा ॥ वर्जयित्वा सुरश्रेष्ठ सावित्रीव्रतमुत्तममिति ब्रह्म-
वैवर्तात् ॥ पौर्णिमानुरोधेन त्रयोदश्यादित्रिरात्रसंपन्नत्वात्तथात्र पोषणादि ग्राह्यं ॥ तस्याः प्राधान्या-
त् ॥ एवममायामपि ॥ अस्यामेव पौर्णिमास्यां विशेषमादित्यपुराणे ॥ ज्येष्ठे मासि तिलान्दद्यात्पौर्णि-
मास्यां विशेषतः ॥ अश्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः ॥ विष्णुधर्मे ॥ ज्येष्ठी ज्येष्ठायुता चेत्स्या-
दन्नपानप्रदानेन नरो नराधिपत्यमाप्नोति ॥ इयं मन्वादिः ॥ तत्रोक्तं वामनपुराणे ॥ उदकुंभांबुधाने
च तालवृंतं सचंदनं ॥ त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि त्विति ॥ इति ज्येष्ठकृत्यानि ॥ आ-
षाढशुक्लदशमी पौर्णिमा ही च मन्वादिः ॥ निर्णयस्तु पूर्वमुक्तः ॥ आषाढभाद्रकार्तिकशुक्लद्वादशी-
षु अनुराधाश्रवणरेवतीयुतासु पारणं कुर्यादिति उक्तं भविष्ये ॥ आभाकासितपक्षेषु मैत्रश्रव- ॥१८॥
१०

णरेवती ॥ संगमे नैव भोक्तव्यं द्वादश्यां द्वादशीं हरेत् ॥ अत्र विशेषो विष्णुधर्मे ॥ मैत्राद्यपादे
स्वपितीह विष्णुः पौष्णस्य पादे प्रतिबोधमेति ॥ श्रुतेश्च मध्ये परिवर्तमेति सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यमिति ॥
आषाढशुक्लैकादश्यां द्वादश्यां वा विष्णुशयनोत्सवः कर्तव्यः ॥ तदुक्तं भारते ॥
एकादश्यां तु शुक्लायामाषाढे भगवान्हरिः ॥ भुजंगशयने शेते क्षीरार्णवजले सदेति ॥ भविष्ये ॥ द्वादश्यां शुक्ल-
पक्षे तु प्रस्वापावर्तनोत्सवादिति वाराहे ॥ द्वादश्यां संधिसमये नक्षत्राणामसंभवे ॥ आभाकासितपक्षे स्वाप-
नादिकं वर्तनेमिति ॥ अत्र द्वादश्यामिति पारणाह विवक्षितं ॥ पारणाहे पर्वतात्रैव तादृशी वाप्यनुमुहूर्तरिति ॥
सुधार्चनं चंद्रिकोक्तेः ॥ इदं च मलमासे न कार्यं ॥ हरिशयने प्रबलिविष्णोः शयनपरिवर्तनमिति ॥ कालादर्शि-
निषेधात् ॥ अत्रैव चातुर्मास्यारंभो भारते उक्तः ॥ आषाढे तु सिते पक्षे एकादश्यामुपोषितः ॥ चातुर्मा-
स्यव्रतं कुर्यात्किंचिन्नियतो नरः इति ॥ अस्य नित्यत्वं तत्रैवोक्तं ॥ वार्षिकांश्चतुरो मासान्वाहयेत्केन चिन्नरः ॥
व्रतेनो चेदाप्नोति किल्बिषं वत्सरोद्भवं ॥ असंभवे तुलार्के तु कर्तव्यं तत्प्रयत्नतः इति ॥ अस्यारंभः शुक्ल-
त्यादावपि कार्यः ॥ नेत्रोपावने मौद्गे च शुक्ले शुभे वा तिथौ ॥ स्कंदे च चिंतयेद्दोषाद्धातुर्मास्याविधौ न-
रः ॥ इदं च द्वितीयाद्यारंभविषयं ॥ एवमारंभो नाद्य द्वितीयायां प्रोक्ष्य वसुव्रतं ॥ अशुद्धे शुचिवापिपूर्वस्त्री चि०
मिरखिपुमान् ॥ अत एव तेन नरः स्नात्वानुयान्ति सर्वपातकैरिति स्कांदोक्तेः ॥ प्राब्धे सूतकं न स्यात्तन्नारब्धे तु सू-
तकमिति ॥ विष्णुवचनाच्च ॥ यत्तु ॥ असंक्रांततया पापा संदेवपित्र्यवकर्मणि ॥ मलमासं प्रशंसन्ति वर्जयेत्

१०
॥७॥

तिमाचरेदिति भविष्यपुराणवचनं तत्प्रथमारंभविषयं ॥ व्रतग्रहणप्रकारस्तु हेमाद्रौ भविष्ये ॥ एवं तु तां प्रति
मां विष्णोः पूजयित्वा तु पं नरः ॥ प्रभाषेत ततो विष्णोः पुरतांजलिपुटस्तथा ॥ चतुरो वार्षिकान्मासान्देवस्योत्थाप न्मार
नावधि ॥ इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युतेति ॥ भविष्ये ॥ श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा ॥ दु
ग्धमाश्वयुजे मासि कार्त्तिके द्विदलं त्यजेत् ॥ स्कांदे ॥ वृतार्यैतानि नित्यानि चतुरो मासवर्त्तिनां ॥ प्रथमे मासि
कर्तव्यं नित्यं शाकव्रतं नरैः ॥ द्वितीये मासि कर्तव्यं दधिव्रतमनुत्तमं ॥ पयोव्रतं तृतीये तु चतुर्थेपि निरामयं ॥
द्विदलं बहुबीजं च वृंताकं चैव वर्जयेत् ॥ नित्यान्येतानि विप्रेंद्र तान्याहुर्मनीषिणः ॥ तथा ॥ जंबीरं राजमा
षांश्च मूलकं रक्तमूलकं ॥ कूष्मांडं चेक्षुदंडं च चातुर्मास्ये सदा त्यजेत् ॥ तथा ॥ शिरीषा बदरी धात्री कूष्मांड
तिंतिणी त्यजेत् ॥ जीर्णधात्रीफलं ग्राह्यं कथं स्यात्कायशोधनमिति ॥ स्कांदे ॥ वार्षिकांश्चतुरो मासान्मत्सु
मैजनाहने ॥ मंचखट्वादि शयनं वर्जयेद्भक्तिमान्नरः ॥ अनृतं वर्जयेद्भाषं पिंडं सम अपूपौदनं ॥ पटो
लं मूलकं चैव वृंताकं च न संप्रयेदित्यादि ॥ व्याघ्रनाव स्थानस्युरुक्तः ॥ मूलपत्रं करीराग्रं फलं कांडं धिरूढकाः ॥
त्वक्पुष्पं कवचं चैव शाकं दशविधं स्मृतमिति युक्तः ॥ अभिरूढं अंकुरः ॥ आचारप्रदीपे ॥ वृंताकं च कलिंगं
च बिल्वोदुंबैभिः सह ॥ उदरे यस्य जीर्यंति तस्य दूरतरो हरिः ॥ निस्पावं रक्तपात्रे ॥ भिस्सटेति दीर्घपाठस्तु भिः
सटाभावकमिति धन्वंतरिनिघंटुः ॥ तथा ॥ निष्पावान्राजमाषांश्च मसूरं संधितानि च ॥ वृंताकं च
कलिंगं च पुनरेव विवर्जयेत् ॥ संधितानि लवणशाकादीनि ॥ अत्रैव तत्सप्रकाधारणमुक्तं रामार्चनचंद्रिका ॥७॥
१०

२

दिनद्वये तव्याप्तौ अव्याप्तौ वा पूर्वा ॥ तथा च बृहस्पतिः ॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ॥ मध्याह्नव्यापिनी
यां ॥ आषाढपौर्णिमास्यां कोकिलाव्रतमुक्तं हेमाद्रौ भविष्ये ॥ आषाढ्यां पौर्णिमास्यां तु संध्याका
ले उपस्थिते ॥ संकल्पयेन्मासमेकं श्रावणे प्रत्यहं स्वयं ॥ स्नानं करिष्ये नियता ब्रह्मचर्ये स्थिता सती ॥ भो
क्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयामिति ॥ अस्य नक्तव्रतत्वात्प्रदोषव्यापिनी ग्राह्या ॥ अत्रैव व्यासपू
जोक्ता ॥ तत्र मध्याह्नव्यापिनी ग्राह्या ॥ दिनद्वये तादृशीत्वे परैवेति सन्न्यासपद्धतौ ॥ ॥ इत्याषाढः ॥ ॥ पौर्णिमास्यं
त श्रावणशुक्लतृतीयायां श्रवणयुक्तायां विष्णुपूजा ॥ तदुक्तं हेमाद्रौ विष्णुधर्मोत्तरे ॥ तृतीया श्रावणे शुक्ला
यास्यां श्रवणसंयुता ॥ तस्यां संपूज्य गोविंदं तु हि पुण्यमवाप्नुयादिति ॥ श्रावणशुक्लतृतीयां मधुश्रवा इत्याहु
र्देशेषु प्रसिद्धा ॥ सा परयुता ग्राह्येति दिवोदासीये ॥ श्रावणशुक्लचतुर्थी गणपतिव्रते मध्याह्नव्यापिनी ग्राह्या ॥
सा तु परतश्चेत्परैवेति ॥ श्रावणशुक्लपंचम्यां नागपूजोक्ता भविष्ये ॥ श्रावणे मासि पंचम्यां शुक्लपक्षे नराधि
प ॥ द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः ॥ पूजयेद्विधिवद्वीर दधिदूर्वांकुरैः कुशैः ॥ गंधपुष्पोपहारैश्च
ब्राह्मणानां च तर्पणैः ॥ ये तस्यां पूजयंतीह नागान्भक्तिपुरःसराः ॥ न तेषां सर्पतो वीर भयं भवति कुत्रचित् ॥
इति ॥ श्रावणशुक्लद्वादश्यां पवित्रं प्रागुक्तं ॥ तत्रैव तत्कालेनाननिषेधः ॥ वत्रघपिताभावात् ॥ अत्रैव द्वादश्यां
विष्णोः पवित्रारोपणं हेमाद्रौ विष्णुरहस्ये ॥ श्रावणस्यासिते पक्षे कर्कटस्थे दिवाकरे ॥ द्वादश्यां वासुदेव
स्य पवित्रारोपणं स्मृतं ॥ द्वादश्यां श्रावणे वापि पवित्रमाप धवाह्निकं ॥ आनुकूल्येन कर्त्तव्यं पंचदश्यामथापि
वेति ॥ सिंहे तु तत्रैव कालोत्तरे ॥ आषाढेति चतुर्दश्यां नभस्ये नभसस्तथा ॥ अष्टम्यां च चतुर्दश्यां पक्षयो
रुभयोः सममिति ॥ अधिवासनं तु दीपिकायां ॥ गोदोहांतरितकाले पूर्वेद्युरधिवासनमिति ॥ गौणकालेत्तुकौ

ध०
॥१०॥

रामार्च्चनचंद्रिकायां॥पवित्रारोपणंकुर्याछ्रावणेनभवेद्यदि॥कार्त्तिक्यांवाविधिःप्रोक्तासूतकेकर्त्तेम
प्रतिनारदः॥अशक्तास्तेपीत्यर्थः॥तैद्या॥हेमरौप्यताम्रक्षौमैःसूत्रैःकौशेयपद्मजैः॥कुशैःका
शैश्चकार्पासैर्ब्राह्मण्याकर्त्तितैःशुभैः॥त्रिस्त्रिगुणितंसूत्रंत्रिगुणीकृत्यशोधयेत्॥तत्रोत्तमपवि
त्रंतुषष्ट्यासहस्रातैस्त्रिभिः॥मध्यमंयासहितैस्त्रिपंचाशताभ्यामध्यमंस्मृतं॥साशीतिनाशतेनैवकनि
ष्ठंतत्समाचरेत॥साधारणपवित्राणित्रीणिसूत्रैःसमाचरेत॥अथमृत्तुरातंग्रंथिपत्राशतंग्रंथिभिःप्र
मं॥कनिष्ठतपवित्रंस्यातषट्त्रिंशद्ग्रंथिभिर्मितं॥षष्टिग्रंथ्युत्तमंद्वासप्तत्याहरीतिचैकेब्रुवन॥सूतुर्वि
शांद्वादशाष्टौरिसंदेहसुनयोविदुरिति॥तन्मात्रेविष्णुरस्थ॥कनिष्ठंतुमिन्नेयसंवित्सराहिभूतिः॥नाच स८
तुःपंचाशातानाहैपंतत्तूनांमध्यममपरं॥उत्तमंचैवतत्तूनांशतमष्टोत्तरंस्मृतं॥अष्टोत्तरसहस्रंतुतत्तूनांपरिसं
कौ० ख्यया॥वनमालीत्युक्ताविद्वद्भिःप्रपूर्वहिसा॥कनिष्ठंनाभिमात्रंस्याद्रूरुमात्रंतुमध्यमं॥पवित्रंचोत्तमंप्रो
क्तंजानुमात्रंप्रमाणतः॥वनमालाप्रमाणेनप्रतिमापादःप्रणीमृतरति॥शिवपवित्रेतुतत्रशिवागमे॥
एकादशादिनर्वीससूत्रैस्त्रिरातौग्रंथिमुक्तया॥पंचाशतानांवाकुर्तंव्यंतत्त्वाग्रंथ्यंतरालकं॥द्वादशांगुलमानादि
भ्योसादधंगुलाधिकं॥लिंगविस्तारमानानिनिद्धतेरूपंवदकुर्वीतकीर्तितं॥तत्रमंत्रः॥देवदेवनमस्तुभ्यंगृहाणे
दंपवित्रकं॥पवित्रीकरणार्थायवर्षपूजाफलप्रदं॥पवित्रकंकुरुष्वाद्ययन्मयादुष्कृतंकृतं॥शुद्धोभवाम्य
हंदेवत्वत्प्रसादात्सुरेश्वरेति॥मलमंत्रसंपरितेनानेनरघातं॥प्रार्थना॥मणिविद्रुममालाभिर्मंदारकु
॥१०॥
ध०

सुमादिभिः॥इयंसांवत्सरीपूजातवास्तुगरुडध्वज॥वनमालांयथादेवकौस्तुभंसततंहृदि॥पवित्रमस्तुतेतद्व
त्पूजांचहृदयेवहेति॥एतच्चनिसं॥तत्रैव॥नकरोतिविधानेनपवित्रारोपणंतुयः॥तस्यसांवत्सरीपूजानि
ष्फलामुनिसत्तम॥तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः॥वर्षेवर्षेविधातव्यंपवित्रारोपणंहरेरिति॥
तथा॥पवित्रारोपणंकालेनकरोतिकथंचन॥तदायुतंजपेन्मंत्रंस्तोत्रंवापिसमाहितइति॥श्रावणशुक्ल
चतुर्दश्यांपवित्रविप्रान्ग्राह्या॥चैत्रशुक्लचतुर्दशीवत॥अथोपाकर्म॥तत्रबह्वृचैःश्रवणेकार्यं॥याजुर्वे
दिभिःपौर्णमास्यां॥सामगैःसिंहगेहस्तेनक्षत्रे॥एषांत्रयाणांतैत्तिरीयादिकानियामकाणि॥एषांग्रहसंक्रांत
दुष्टेत्वेबह्वृचैःश्रावणशुक्लपंचम्यांपूर्वाह्णेभिभद्रपदायेवा॥यजुर्वेआषाढ्यांउक्तैतैराषाढ्यांकार्यं॥वा
जसनेयिभिस्तुपंचम्यां॥उपाहरेतिस्कंदपंचम्यांकार्यावाजसनेयिभिरितिवचनात॥वाजसनेयिग्रहणंयेषांप
त्यंपंचमीउक्तातेषामुपलक्षणं॥गृहसंक्रांतियोगश्राद्धरात्रौसर्वविषमानएवदूषकोनान्यथा॥तथाचगा
र्ग्यः॥अर्द्धरात्रादधस्ताच्चेत्संक्रांतिर्ग्रहणंतथा॥उपाकर्मनकुर्वीतपरतश्चेन्नदोषकृदिति॥इदंचकर्कटस्थेभा
नौविधेयं॥सचनिषेधोनर्मदोत्तरभागविषयः॥नर्मदोत्तरभागेतुकर्त्तव्यंसिंहयुक्तके॥कर्कटेसंस्थितेभानौ
उपाकुर्याच्चदक्षिणइतिवचनात॥एतच्चशुक्रास्तादावपिकार्यं॥प्रथमारंभस्तत्रनकर्त्तव्यः॥अधिमासेन
वृत्तेव॥सापरानामधिमासेपिभवति॥तेषांसिंहस्थसूर्यविधानात॥एतच्चसामगैरपराह्णेकार्यं॥इतरैःपूर्वा
ह्णेकार्यं॥इदंचोपासनाग्नौभवतिअध्यायोपाकरणंचेरितिपक्षेलौकिकेपि॥श्रावण्यामाभवलोपनेन

सू०
॥२६॥

श्रवणाकर्मेति ॥ श्रावण्यां पौर्णमास्यां श्रवणाकर्मेति ॥ तत्रास्तमयप्रयुक्ता ग्राह्या ॥ अस्तमिते स्थालीपा
कं श्रपयितीति अस्तमयकाले विधानात् कर्मणो यस्य यः काल इति वचनात् ॥ याज्ञिकास्तु पौर्णिमासी
शब्दस्य पर्वात्यक्षणवचनत्वात् सर्वसंधिनिरात्रौ श्रवणाकर्मानुष्ठानं वदंति ॥ अत्रैव रक्षाबंधनमुक्तं
हेमाद्रौ भविष्योत्तरे ॥ ततोपराण्हसमये रक्षापोट्टलिकां शुभां ॥ कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमचर्चितां ॥ त
त्र मंत्रः ॥ येन बद्धो बली राजा दानवेंद्रो महाबलः ॥ तेन त्वामभिबध्नामि रक्षे मा चल मा चलेति ॥ अत्राप
राण्हव्यापिनी पूर्वा ग्राह्या ॥ श्रावणी दुर्गनवमी दूर्वा च कृतानि [illegible] ॥ पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बले
र्दिनमिति बृहद्यमवचनाच्च ॥ अस्याः सिद्धिविशेषवचनात् ॥ अन्येषु पिपर्वसु त्रातोपवणादि श्रावणी सर्व
दैव ग्राह्या ॥ सर्वस्यां भद्रासत्वे तदुत्तरदिन एव रक्षाबंधनकार्यं ॥ भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गु
नी तथा ॥ श्रावणी नृपतिं हंति ग्रामं दहति फाल्गुनी इति वचनात् ॥ अत्र तस्मान्नरेंद्रः ॥ भाद्रे शुक्ले हि गौ
दैवयस्य गोः संप्रसूयते ॥ परपांत तस्या विदि हि षष्ठिमासैर्न संशयः ॥ तस्मात्तिथि [illegible] पापनिपतन सपुत्रस्व
ल ॥ आहुतीश्चाज्यतात्कालीनाः पुत्रजुहुयात्ततः ॥ व्याहृतिभिः समाप्य होमः ॥ सोपवासः प्रपठेन्नरः पादि श्राय
पृष्ठ्यः
दक्षिणामिति ॥ अथ वर्षे दिने परिसिद्धे ॥ माघेषु भवन्महिषी श्रावणे वडवा दिवा ॥ सिंहे गावः प्रसूयंते
स्वामिनो मृत्युदायकाः इति अत्र तदुक्ता अद्भुतोशांतिः कार्या ॥ श्रावणादिमासचतुष्टये लक्षपक्ष

॥२६॥
सू

द्वितीयासु अशून्यशयनव्रतं ॥ तत्र चंद्रोदयव्यापिनी ग्राह्या ॥ दिनद्वये तत्सत्वे असत्वे वा परा ॥ चतुर्ष्व
पि पक्षेषु मासेषु श्रावणादिषु ॥ अशून्याख्यं व्रतं कुर्याज्जेयपायात्फलाधिकमिति मदनरत्ने धृत
वचनात् ॥ श्रावणकृष्णतृतीया कज्जलीसंज्ञा सापि तिथिविवेकसूर्योदये ॥ नभो बहुलचतुर्थी बहुलाख्या
मध्यदेशे प्रसिद्धा ॥ सा च सायाण्हव्यापिनी ग्राह्या ॥ दिनद्वये तद्व्याप्तौ पूर्वा ॥ अत्र गोपूजा पूर्वाचा
रान्नं च कार्यमिति दिवोदासीये ॥ अस्यामेव चतुर्थ्यां संकष्टचतुर्थीव्रतं ॥ तत्कारे ॥ श्रावणे बहुले पक्षे
चतुर्थ्यां तु विधूदये ॥ गणेशं पूजयित्वा तु चंद्रायार्घ्यं च दीयतामिति ॥ इयं चंद्रोदयव्यापिनी ग्राह्या ॥ क
र्मणो यस्य यः कालः इति वचनात् ॥ तत्कालेनार्घ्यदानविधाने [illegible] पत्रतत्ताच्चंद्रोदयव्रतेति चि
ता कालिकी स्मृते तिवचनाच्च ॥ दिनद्वये चंद्रोदये सत्वे असत्वे वा पूर्वा ग्राह्या ॥ तत्परस्य तु तृतीया
यां महापुण्यफलप्रदा ॥ कृत्यरत्नावल्यां तिथिर्वत्सगणनायां सती पृणीति वत्सवचनात् ॥ गणेशगोरी
बहुलाख्या तिथिरिक्ता प्रकीर्तिता ॥ चतुर्थ्यां क्षयमी [illegible] दीक्षाप्त तरपोगत इति वचनाच्च ॥ न च तृतीया
विधाय
कानि
विद्धैव चना नेदिवा त्रिमुहूर्त्तविधेस्तस्यैव प्रवृत्तेः मरात्रियोग इति वाच्यं ॥ रात्रिसाध्ये कर्मसु तत्राव पिवेध
स्य जन्माष्टमी प्रकरणे माधवादिभिर्दर्शितत्वात् ॥ अतएव महालक्ष्मीसमापने दिनद्वयेपि अष्टम्यां चं
द्रोदयव्याप्तिेऽपूर्वा सेत्युक्तं अष्टमीचैव सापक्षेचेत्तु दृश्यते ॥ सर्वविधिरेव कर्त्तव्या परविद्धा न कुत्रचिदिति व

ह०
॥२३॥

वचनात्सैवं च ग्राह्येत्युक्तं हेमाद्रौ मदनरत्ने च ॥ यानि तु ॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ॥ मध्या
ह्नव्यापिनी सा तु परतश्चेत्परेह्नि स्यादिति वचनानि तानि सिद्धिविनायकादिव्रतविषयाणि ॥ तेषु मध्याह्न
स्य कर्मकालत्वात् ॥ प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप इति वचनात् ॥ अत एव माधवेन मध्याह्नस्य क
र्मकालत्वमंगीकृत्यैव विनायकव्रते मध्याह्नव्यापिनी ग्राह्येत्युक्तं ॥ तस्माद्गुणफलकामस्ये सत्येव सत्त्वे वा पूर्वे
श्रावण वेति न्यायेः पंथाः ॥ इत्यलं बहुना ॥ ॥ अथ जन्माष्टमी ॥ ॥ सा च [illegible] मीपूर्णिमांतमासपक्षे भाद्रपदकृष्णा
ष्टमी ॥ शुद्धा विद्धा चेति द्विधाप्यष्टमी प्रत्येकं द्विधा ॥ द्वितीयदिने सूर्योदयोत्तरं सत्त्वासत्त्वाभ्यां ॥ ताश्चत्वार्यपि पु
नः प्रत्येकं द्विधा रोहिणीसहिता तद्रहिता च ॥ तत्र शुद्धायां विद्धायां वा द्वितीयदिने सूर्योदयादूर्ध्वमस
त्त्वां विवाद एव नास्ति ॥ द्वितीयदिने अष्टम्यभावात् ॥ शुद्धिकायां विद्धाधिकायां वा एकस्मिन्नेव दिने रो
हिणीयोगे सैव रोहिणीयुता सैव ग्राह्या ॥ दिनद्वयेपि रोहिणीयोगे सप्तमीविद्धानिषेधान्नवमीयुक्ता
१०ये याः प्रशस्तत्वात्परैव ॥ दिनद्वयेपि रोहिणीयोगाभावे अर्धरात्रिव्यापिनी ग्राह्या ॥ अर्धरात्रस्य
कर्मकालत्वात् ॥ दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला ॥ रात्रियुक्तां प्रकुर्वीत विशेषेणेंदुसंयु
तामिति वचनाच्च ॥ इदं च नित्यं ॥ वर्षे वर्षे तु कर्तव्यं तुष्ट्यर्थं चक्रपाणिन इति वीप्साश्रवणात् ॥ अकु
र्वन्नरकं यातीत्यादिवाक्ये अकरणे प्रत्यवायश्रवणाच्च ॥ काम्यं च फलस्यापि श्रवणात् ॥ त
था च स्कांदे ॥ सिध्यंति सर्वकार्याणि कृते जन्माष्टमीव्रते इति ॥ पारणं तु केवलाष्टम्युपवासे तिथ्यंते ॥ ॥२३॥
२०

रोहिणीयुक्ताष्टम्युपवासे उभयांते कर्तव्यमिति मुख्यः पक्षः ॥ अन्यतरांते गौणः ॥ यदि
रात्रावुभयोरन्यतरस्यांतः स्यात्तदा रात्रावपि पारणं कुर्यादिति तिथ्यंते रोहिणीवृत्तांत ॥ तत्र नक्ष्यति
तयोः पूर्विन्न यितां महानिशामिति वचनात् ॥ अन्ये तु तिथिनक्षत्र सर्वांते कुर्यात् ॥ माधवेन तु ॥ याम
त्रयाधिका यामिन्यां प्रातरेव हि पारणमिति ॥ वचनं लिखितं तदनुसारेणैव निर्णयः स्मृतः ॥ श्री २४
देवकीवसुदेवनंदयशोदादिप्रतिमानिर्माणं तत्पूजाप्रकारश्च [illegible] द्रष्ट
व्यं ॥ विस्तरभयान्नेह लिख्यते ॥ संकल्पमंत्रस्तु ॥ वासुदेवं समुद्दिश्य सर्वपापप्रशांतये ॥ उ
पवासं करिष्यामि कृष्णाष्टम्यां नभस्यहमिति ॥ चंद्रार्घ्यमंत्रस्तु भविष्ये ॥ क्षीरोदार्ण
वसंभूत अत्रिगोत्रसमुद्भव ॥ गृहाणार्घ्यं शशांकेमं रोहिण्या सहितो मम ॥ ज्योत्स्ना
पते नमस्तुभ्यं नमस्ते ज्योतिषां पते ॥ नमस्ते रोहिणीकांत अर्घ्यं नः प्रतिगृह्यतामिति ॥
श्रावणामावास्यायां कुशग्रहणमुक्तं तदुक्तं हेमाद्रौ हारीतेन ॥ मासे नभस्यमावास्या तस्यां
दर्भोच्चयो मतः ॥ अयातयामास्ते दर्भा विनियोज्याः पुनः पुनरिति ॥ नभाः श्रावणः ॥ दर्थं
लपक्षेणेदं ॥ मदनरत्ने तु ॥ मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः इति मरीचिवाक्य

कृत्य
॥१२॥

मुहूर्तं तं गतपूर्णिमांतमासाभिप्रायेति हारीतेन एकवाक्यतैव ॥ इति श्रावणकृत्यानि ॥
भाद्रपदशुक्लतृतीयायां हरितालिकाव्रतं ॥ तत्र सा परा ॥ रंभाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम ॥
अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते इति ब्रह्मवैवर्तात ॥ तृतीया तु न कर्तव्या द्वितीयासंयुता तिथि
रिति स्कांदे ॥ द्वितीयायुक्तानिषेधाच्च ॥ निषेधश्चायमेकश्च द्वितीयावेधो न त्रिमुहूर्तः ॥ किंतु कला
काष्ठादिरूपोपि ॥ तदुक्तं स्कांदे ॥ कलाकाष्ठापि वा चैव द्वितीया संप्रदृश्यते ॥ सा तृतीया न क
र्तव्या कर्तव्या गणसंयुतेति ॥ अत एव स्वल्पापि तृतीया चतुर्थीयुक्ता एकादशीवद्ग्राह्या ॥ अ
यं चावेधप्रयुक्तो निषेधो गौरीव्रतविषयः ॥ विहायैकां तु रंभाख्यामिति पर्युदासेन तत्सद्भावा
नामेव व्रतांतराणां प्रतीतेः ॥ न विशेषयुक्तमन्यसद्भावार्थ इति न्यायात् ॥ तथैव निषिद्धसमानानाराध्ये
ति ॥ भाद्रशुक्लचतुर्थ्यां सिद्धिविनायकव्रतं ॥ स्कांदे ॥ स्कंद उवाच ॥ गजवक्त्रे तु शुक्लायां चतुर्थ्यां
पूजयेन्नृप ॥ यदा चोत्सहते भक्तिस्तदा पूज्यो गणाधिपः ॥ प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूज
येन्नृप ॥ स्वशक्त्या गणनाथस्य स्वर्णरूप्यमयाकृतिं ॥ अथवा मृन्मयीं कुर्याद्वित्तशाठ्यं न
कारयेत ॥ गणनाथ सिद्धिविनायकस्य ॥ तस्य रूपमुक्तं तत्रैव ॥ एकदंतं शूर्पकर्णं गजवक्त्रं चतु ॥१२॥
६॰

भुजं ॥ पाशांकुशधरं देवं ध्यायेत्सिद्धिविनायकमिति ॥ एवं प्रतिमां कृत्वा प्राणप्रतिष्ठां कुर्यात ॥
तद्विधिः कालिकापुराणे ॥ प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना ॥ प्राणप्रतिष्ठां कुर्वीत
तस्या देवस्य वा हरेः ॥ अकृतायां प्रतिष्ठायां प्राणानां प्रतिमासु च ॥ यथापूर्वं तथाभावः स्वर्णादीनां
न देवता ॥ अन्येषामपि देवानां प्रतिमास्वपि पार्थिव ॥ प्राणप्रतिष्ठा कर्तव्या तस्यां देवत्वसिद्ध
ये ॥ अथ प्राणप्रतिष्ठाप्रयोगः ॥ गणेशप्रतिमायाः कपोलौ दक्षिणपाणिना स्पृष्ट्वा ॥ ॐ गं ॐ गणाधी ग॰५
शेति मंत्रं पठित्वा गणेशाय प्राणाः प्रतिष्ठंतु गणेशाय प्राणाः क्षरंतु च ॥ गणेशोपदेवत्वसंख्यायै
स्वाहा ॥ अन्यतद्बीजमंत्रोपठित्वा चतुर्थ्यंतैस्तु तत्पदयुक्तं मर्दार्कमंत्रं पठेत्ततः ॥ दत्त्वा पूजां प्रयत्ने
न स्नाप्य पंचामृतैः पृथक् ॥ गणाध्यक्षेति नाम्ना ते गंधं दद्याच्चाक्षतान्नितः ॥ विनायकेति पुष्पाणि धू
पं चोमासुतेति च ॥ दीपं रुद्रप्रियायेति नैवेद्यं विघ्ननाशिने ॥ वस्त्रं सर्वप्रदेत्युक्तं युग्मं दद्यात्सुभावितः ॥
ततो दूर्वांकुरान्पंचविंशतिं चैकमेव हि ॥ पूजनीयः प्रयत्नेन दशभिर्नामपदैः पृथक् ॥ तानि वक्ष्यंते ॥
दूर्वायुग्मं गृहीत्वा तु गंधयुक्तं प्रपूजयेत ॥ एकैकेन च नाम्ना वै दत्त्वैकं सर्वनामभिः ॥ तथैकविंशति
गृह्य मोदकान्घृतपाचितान ॥ स्थापयित्वा गणाध्यक्षं समीपे कुरुनंदन ॥ दश विप्राय दातव्याः स्वयं चा
घासत्याहरा ॥ एवं गणाधिपे दद्यात्सनैवेद्यं घन्योतनम ॥ विप्राय भोजनं दद्याद्भूयात्तैलवर्जितमिति ॥ अ श्री॰

अथसंक्षेपेणप्रयोगः॥प्रातःस्नात्वानित्यक्रियःसूर्यादिदेवेभ्योव्रतंनिवेद्योदङ्मुखोवारिपूर्णताम्र
पात्रंगृहीत्वाममसर्वकर्मनिर्विघ्नसिद्धिपुत्रसौभाग्यसंपत्प्राप्तिद्वाराश्रीगणेशप्रीत्यर्थंसिद्धिवि
नायकप्रीत्यर्थंसिद्धिविनायकव्रतंकरिष्यइतिसंकल्प्यप्रतिमांकृत्वाऽप्राणप्रतिष्ठांकृत्वाआ
वाहनादिकृत्वापंचामृतैःपृथक्संस्नाप्यगणाध्यक्षायनमः॥गंधंसमर्पयामि॥विनायकाय॰
पुष्पं॰॥उमासुताय॰धूपं॰॥रुद्रप्रियाय॰दीपं॰॥विघ्ननाशिने॰एकमोदकसहितंनैवेद्यंसमर्प
यामि॥सर्वप्रदे॰रक्तवस्त्रयुग्मंदत्वाएकविंशतिदूर्वाःसगंधागृहीत्वाएकैकेननाम्नादूर्वायुग्मं
दद्यात्॥तद्यथा॥गणाधिपाय॰दूर्वायुग्मंसमर्प॰उमापुत्राय॰अघनाशाय॰विनायकायको
य॰ईशपुत्राय॰सर्वसिद्धिप्रदायकाय॰एकदंताय॰इभवक्त्राय॰मूषकवाहनाय॰कुमारगुरु
वे॰ततोवशिष्टामेकांगणाधिपायेत्यादिदशनामभिःसमर्प्यविंशतिमोदकान्गणेशाग्रेस्था
प्य॥दशब्राह्मणायसदक्षिणान्दत्वाब्राह्मणायभोजनंदत्वास्वयंदशमोदकसहितमतैलपक्व
मन्नंभुंजीतेति॥ ॥अथचतुर्थीमध्यान्हव्यापिनीग्राह्या॥ ॥प्रातःशुक्लतिलैःस्नात्वाम
ध्यान्हेपूजयेन्नृपेति॥स्कंदपुराणेमध्यान्हस्यकर्मकालत्वाभिधानात्॥चतुर्थीगण

नाथस्यमातृविद्धाप्रशस्यते॥मध्यान्हव्यापिनीसातुपरतश्चेत्परेहनीतिवचनाच्च॥अत्रपरतश्चे
दितिएकदिनएवमध्यान्हव्यापित्वेपराअन्यथासर्वपक्षेषुपूर्वा॥मातृयोगस्यप्रशस्तत्वात्॥अस्यां
चंद्रदर्शनंनकर्तव्यं॥तथाचमार्कंडेयः॥सिंहादित्येशुक्लपक्षेचतुर्थ्यांचंद्रदर्शनं॥मिथ्याभिदूषणं
कुर्यात्तस्मात्पश्येन्नतंसदेति॥पराशरः॥कन्यादित्येचतुर्थ्यांतुशुक्लेचंद्रस्यदर्शनं॥तथाभिदूषणं
कुर्यात्तस्मात्पश्येन्नतंसदा॥दोषस्यशांतयेसिंहःप्रसेनमितितैपठेत्॥अत्रसिंहादित्यकन्यादित्ययोर्ग्र
भ्यांचांद्रोभाद्रपदउपलक्ष्यते॥श्लोकस्तुविष्णुपुराणे॥सिंहःप्रसेनमवधीत्सिंहोजांबवताहतः॥सु
कुमारकमारोदीस्तवह्येषस्यमंतकइति॥भाद्रशुक्लपंचमीऋषिपंचमीसासामान्यनिर्णयोक्तैव॥
उत्तरैवमध्यान्हव्यापित्वेउत्तरामनुष्यदेवत्यत्वेनमध्यान्हव्यापित्वेकालव्याप्तेः॥ ॥भाद्रशुक्लसप्तम्या
म्मुक्ताभरणव्रतं॥तत्रैसप्तमीपूर्वविद्धाग्राह्या॥ ॥षण्मुन्योरितियुग्मवाक्यात्॥ ॥भाद्रशुक्लाष्टमीदू
स८ र्वाष्टमी॥साचपूर्वविद्धाग्राह्या॥श्रावणीदुर्गनवमीदूर्वाचैवहुताशनी॥पूर्वविद्धैवकर्तव्येतिबृ
हद्यमवचनात्॥शुक्लाष्टमीतिथिर्यातुमासिभाद्रपदेभवेत्॥दूर्वाष्टमीतुसाज्ञेयानोत्तरासावि
धीयतइतिहेमाद्रिधृतपुराणसमुच्चयवचनाच्च॥इदंचदूर्वाव्रतंज्येष्ठामूलरहितायांसिंह
स्थिसूर्येऽगस्तेऽनुदितेमध्यान्हव्यापिन्यांकर्तव्यं॥शुक्लेभाद्रपदेमासिपूर्वासंयुतातुयाष्टमी॥सिं
हार्कएवकर्तव्यानकन्यार्केकस्यचन॥सिंहस्थेसूर्यमासे

येत्तु इति मुनिसत्तम इति स्कान्दात् ॥ अगस्त्य उदिते तात प्रपूजयेत्प्रयतो ध्रुवां ॥ वैधव्यं पुत्रनाशो कंचिद्दुःख
न पश्यति पंचमे चेति ॥ तत्रैव रोहिण्यां नाम्नी ॥ मुहूर्ते रोहिणी अष्टम्यां पूर्वविद्धा परा ॥ पूर्वां स्मृत
सा कायज्येष्ठां फलं च वर्जयेदिति पुराणसमुच्चयवचनाच्च ॥ तथा ॥ ऐन्द्रर्क्षे पूजिता देवी हंत्यपत्या
नि नान्यथा ॥ भर्तुः पुत्रहरा मूले तस्मात्तां परिवर्जयेदिति निषेधाच्च ॥ इदं च स्त्रीणां नित्यं ॥ यो न प्र
जयते देवी मोहादिह यथाविधिः ॥ त्रीणि जन्मानि वैधव्यं लभते नात्र संशयः ॥ तस्मात्सं पूजनीया
सा प्रतिवर्षं वधूजनैः ॥ सुखसंतानजननी भर्तुः सौख्यकरी सदेति पुराणसमुच्चयोक्तेः ॥ तेन पर्व
स्यां ज्येष्ठामूलान्यतरयोगे उत्तरा पितृहिता कर्मकालस्पर्शिनी ग्राह्या ॥ नित्यत्वाच्च यस्मिन्व
र्षे ज्येष्ठामूलयोगरहिता [illegible] लाभस्तत्राप्यनुकल्पेनानुष्ठानं न तु सर्वथा त्यागः ॥ अनुकल्पश्च वक्
र्तव्यो [illegible]न ज्येष्ठामूलं यदा भवेत् ॥ पूर्वमभ्यर्चयेद्भक्त्या नवं [illegible] दिवसं नयेदिति तत्रैवोक्तेः ॥ ज्येष्ठा
मूलग्रहणं निषिद्धकाल [illegible] ग्रहणं ॥ तत्राप्यपेक्षा संसात ॥ अत्र कर्तव्यमुक्तं मदनरत्ने भविष्ये
शुचौ देवी प्रजाता यां पूर्वां ब्राह्मणोत्तम ॥ स्थाप्य लिङ्गं ततो गंधैः पुष्पैर्धूपैः समर्चयेत् ॥ दध्यक्षतैर्
[illegible] त्रिदोलकैः ॥ पूर्वरात्रौ भ्यां विधिवत्पूजयेत्प्रयतो चिता ॥ मंत्रस्तु ॥ त्वं पूर्वं मंतज
न्मा शिवं दिता सिद्धसुरासुरैः ॥ सौभाग्यं संततिं देहि सर्वकार्यकरी भव ॥ यथा शाखाप्रशाखाभिर्वि

स्तृतासि महीतले ॥ तथा ममापि संतानं देहि त्वमजरामरमिति ॥ अत्र अनग्निपक्वान्नभक्ष [illegible] ॥
अनग्निपक्वमश्नीयाद्दत्तं दधि फलं तथा ॥ अक्षारलवणं वल्लं [illegible] मुनान्वितं ॥ अत्र नि
योगाभावे स्त्रीभिः स्वयं पूर्वोक्तरसं ज्यमनग्निपक्वभक्षणं कार्यं ॥ तद्योगे ब्राह्मणद्वारा पूजां का
रयित्वा का भक्तं कायमिति ॥ अस्यामेव ज्येष्ठापूजा कार्या ॥ कन्यास्थे अर्के [illegible] शुक्ला ज्येष्ठर्क्षे
महती सत्ता ॥ अलक्ष्मीपरिहाराय ज्येष्ठां तत्र प्रपूजयेदिति ॥ लिङ्गपुराणात् ॥ अत्र कन्य
स्थोऽर्के यो तेन प्राशस्त्यमात्रं ॥ मासस्तु भाद्रपद एव ॥ अत्राष्टम्याः खंडत्वे ज्येष्ठायुता
पूर्वा परा वा ग्राह्या ॥ यत्तु ज्येष्ठानक्षत्रमात्रा [illegible] तिथिर्न ताद्दिनं ज्येष्ठापूजा सुपत्रं तत प
स्यां तिथौ ज्येष्ठानक्षत्रं भवति तस्यां कर्तव्यं ॥ मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते ॥ यस्मि
न्कस्मिन्दिने वापि ज्येष्ठां देवीं प्रपूजयेदिति स्कन्दपुराणात् ॥ यस्मिन्कस्मिन्दिने कस्यां कस्यांचि
त्तिथावित्यर्थः ॥ ज्येष्ठानक्षत्रस्य खंडत्वे मध्यान्हात्पूर्वमनुवर्तमानं ग्राह्यं ॥ यस्मिन्दिने भवेज्ज्येष्ठा
मध्यान्हादूर्ध्वमप्यणु ॥ तस्मिन्नह्नि विधेयं [illegible] पूजा चेत्सर्ववासरे इति स्कान्दात् ॥ तथा ॥ मैत्रेण
वाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत् ॥ मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तममिति ॥ मंत्रस्तु ॥ ज्येष्ठा

२ी०
॥१६॥

यैतेन मस्ताघ्र्यं अघ्र्यं यैतेन मोनमः॥ गत्वा वर्षायैतेनमस्ताघ्र्यं त्र्यांकयैतेनमोनम इति॥ अस्यामेव महालक्ष्मी
व्रतारंभः॥ तत्र साष्टमीयुता ग्राह्या न दशमीविद्धा क्वापि॥ भाद्रशुक्लपक्षे द्वादशी श्रवण [illegible] योगे पारणं न का
र्यं॥ आभाद्रसितपक्षे स्थितिसर्वेषां तत्र वचनात्॥ उपोष्यैकादशीमितां पारणं वर्जयेद्धि॥ करोति हति
तस्तु पुण्यं द्वादशीद्वादशीसमवमिति स्कांदात्॥ अत्र चैत्रे धा विभ नेमि व्याप्ती गर्भपारणं वर्ज्यमित्युक्तं॥ ४ श्रवण
विष्णुधर्मे॥ अतोन्यमध्ये परिवर्तमेति सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यमिति॥ अत्रैव परिवर्तनोत्सवं कुर्या
त्॥ अते श्च न मध्ये परिवर्तमेतीति वाक्यात्॥ अत्रैव [illegible] आपन मुक्तमप [illegible] भार्गेण॥ द्वादश्यां
तु सितेपक्षे मासी प्रौष्ठपदे तथा॥ नरो [illegible] उत्थापयेत्प्रजा विश्व श्रवणवासरे॥ ॥ इत्यश्रवणद्वादशी॥ ॥ अ मेव ५
स्या अभावे श्रवणयोगेपि त्रिमिश्रामुपवासो विभवति॥ तदुक्तं मात्स्ये॥ द्वादशी श्रवणस्पृष्टा स्यात्पुण्यतमा
तिथिः॥ न तु सा तेन संयुक्ता कालवत्सु [illegible] इति॥ तत्रैतस्मिन्दिने श्रवणयोगे येव श्रवणयुतासैव ग्राह्या एव
विद्धाधिकायां दिने द्वयेपि श्रवणयोगे एकादशीयुता ग्राह्या॥ द्वादशी श्रवणस्पृष्टा एकादशीय
ह॥ स एव वैष्णवो योगो विष्णुशृंखलसंज्ञितः॥ उपोष्य विधिवत्तत्र नरः संक्षीणकिल्बिषः॥ प्राप्नोत्यनुत्तमां
सिद्धिं पुनरावृत्तिदुर्लभामिति मत्स्यपुराणात्॥ तथा नारदीये॥ सेयं [illegible] एकादशी राजन् द्वादशीयं हि सं
स्यात्॥ श्रवणं त्वातिथिं [illegible] सहस्राख्यपोहतीति॥ तत्रैकादशीप्रयुक्तं द्वये॥ शुद्धाधिका
यादिनद्वयेपि श्रवणयोगे उदये तद्योगवती ग्राह्या॥ उदयव्यापिनी ग्राह्या श्रवणद्वादशीव्रतद

२ मुपवास

॥१६॥
२ी०

ति बहून्नारदीयात्॥ यदा तु एकादश्येव श्रवणयुक्ता न द्वादशी तदा तस्यामपि व्रतं भवति॥ यदा न
आप्यते ऋक्षं द्वादश्यां वै [illegible] क्वचित्॥ एकादशी तदोपोष्या पापघ्नी श्रवणान्विता॥ इति॥ नारदीयात्॥
विद्धा या एव श्रवणयोगे विद्धापि ग्राह्या॥ दशम्येकादशी यत्र सा नोपोष्या भवेत्तिथिः॥ श्रवणेन तु
संयुक्ता सा शुभा सर्वकामदा॥ इति वह्निपुराणात्॥ इयं च बुधवारेऽतिप्रशस्ता॥ अत्र व्रते सा प्यं नित्यमि
ति केचित्॥ पारणे उभयांतो मुख्यः॥ अन्यतरांतो गौणः॥ अत्र संगमस्नानादि कार्यं॥ भाद्रपदे श्र
वणे काद्श्यां द्वादश्यां वा मध्याह्ने वामनावतारः॥ तत्र वामनपूजा प्रतिमादानादिकं व्रतकांडे द्रष्ट
व्यं॥ अस्यामेव दुग्धव्रतसंकल्पः॥ दुग्धव्रते पायसादिकं वर्ज्यं॥ दधि घृतादयस्तु हिकारास्तु ग्राह्याः॥
॥ ॥ भाद्रशुक्लचतुर्दश्यामनंतव्रतं॥ तत्र पूर्वाह्नव्यापिनी ग्राह्या॥ देवकमतात्॥ चतुर्दश्यां [illegible] तु
गमवाक्याच्च॥ केचित्तु मध्याह्ने भोज्यवेलायामिति तत्कथायां श्रवणान्मध्याह्नव्यापिनी ग्राह्येति
वदंति॥ एतस्य दूषणमन्यत्र मत्कृतौ द्रष्टव्यं॥ सिंहसंक्रांतिदिनमारभ्यैकविंशतिमे दिने अगस्त्योदयः॥
तदुक्तं दिवोदासीये॥ उदेति याम्यां हरिसंक्रमाद्रवेरेकाधिकविंशतिमे त्वगस्त्य इति॥ तत्रैकोना
पुष्पमयीमगस्त्यप्रतिमां [illegible] अगस्त्यः [illegible] अर्घ्यं [illegible] दद्यादिति व्रतकांडे स्प
ष्टं॥ भाद्रपदपौर्णमास्यां प्रचिता महालयश्राद्धं [illegible] कार्यं॥ तदुक्तं मार्कंडेयपुराणे॥ नां

१०
ना०२१॥

दीमुखानां प्रत्यब्दं कन्यागते रवौ॥ पौर्णमास्यां तु कर्तव्यं वराहवचनं यथेति॥ नांदी
मुखत्वं द्विरिति तत्रैव॥ पिता पितामहश्चैव तथैव प्रपितामहः॥ त्रयो ह्यश्रुमुखा ह्येते पित
रः परिकीर्तिताः॥ तेभ्यः सर्वतरा ये च प्रजावंतः सुखोचिताः॥ ते तु नांदीमुखा नांदी संपद्धिरिति कथ्यत इति॥
एतच्च नित्यं प्रत्यब्दमिष्यते॥ एतच्च पार्वणविधानेन कार्यं॥ अथ महालयाः॥ तत्र बह्वृचाः॥ शुक्लप्रतिपदादिशु
क्लप्रतिपदंत एकः॥ प्रतिपदादिदर्शांतो द्वितीयः॥ पंचम्यादिरष्टम्यादिर्दशम्यादिश्चेति चतुर्दशीवर्जं दर्शांतमित्यपरे॥
दशासमपंचतिथिपक्षाः॥ एकदिनपक्षश्चेति॥ तत्र प्रथममाह कार्ष्णाजिनिः॥ नभस्यस्यापरे पक्षे तिथिः षोड
शकः स्मृतः॥ कन्यागतो भवेत्स्यात्तु तस्य कालः श्राद्धकर्मणीति॥ चेदित्यसंदिग्धे संदिग्धवचनं॥ तिथिषोडशकश्चापि
वाह्योत्तरां प्रतिपदमारभ्येति दृवलेनोक्तं॥ अहः षोडशकं यत्तु शुक्लप्रतिपदा सह॥ चंद्रक्षयाविशेषेण सापि दर्शात्मिका
स्मृतेति॥ पंचदशासमपंचतिथिपक्षा ब्रह्मपुराणे॥ अश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने॥ त्रिभागहीनं पक्षं वा त्रि
भागं त्वर्द्धमेव वेति॥ तृतीयो भागस्त्रिभागः पक्षस्य॥ तद्धीनता चाद्यानां चतसृणां चतुर्दश्याश्च वर्जनात्॥ एवमर्द्धत्रिभा
गयोरपि चतुर्दशीवर्जनं॥ नभस्यापरपक्षे श्राद्धं कुर्याद्दिने दिने॥ नैव नंदादि वर्ज्यं स्यान्नैव वर्ज्या चतुर्दशीति वचनेन नप्र
तिपदादिपक्षे चतुर्दशीवर्जननिषेधादितरपक्षे तु तद्वर्जनं प्रतीतेति॥ नंदादिवर्जनं तु नभवति संख्यादीनि प्रसंगात्॥
गौतमः॥ अथापरपक्षे श्राद्धं पितृभ्यो दद्यात्पंचम्यादि दर्शांतमष्टम्यादि दशम्यादि सर्वस्मिन्वेति॥ एकदिनपक्षो॥ नाग
रखंडे॥ आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे॥ यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे॥ तस्य संवत्सरं यावत्त
प्ताः स्युः पितरो ध्रुवमिति॥ अस्मिंश्च पक्षे नंदादिवर्जनमाह नारदः॥ ननंदासु भार्गववारे रोहिण्यां च त्रिजन्मसु॥ एवसा

५स्य

ना०२१॥
१०

न्वमघायां न कुर्याद्दापरपक्षिकमिति॥ नंदाः प्रतिपदाद्युक्ते कारस्य॥ त्रिजन्मानि आद्यदशमैकोनविंशानि
नक्षत्राणि॥ एतत्तु कर्तुश्च पुत्रभार्ययोः त्रिजन्मर्क्षाणि वर्जयेदिति वचनेन तद्धरिसाकरे तथैव व्याख्येयं॥ कर्तु
स्तत्भार्यायाः पुत्रस्य च यानि त्रीणि त्रिजन्मर्क्षाणि॥ आद्यदशमैकोनविंशानितानि वर्जयेदिति॥ अन्यथा त्रिश
ब्दस्य बहुवचनस्य चैवैयर्थ्यात्॥ केचित्तु त्रिजन्मानीत्यत्र जन्मतस्त्रैस्तिर नक्षत्राणीति व्याख्यातं तस्त्रैवेति र
नक्षत्रयोर्जन्मनक्षत्रवाच्यत्वाभावादुपेक्षितं॥ अन्यत्रापि॥ नंदाश्चक्रामरव्याराष्ट्रव्यग्निपित्र्यकालभे॥ गंडे वैधृ
तिपाते च पिंडसंन्यासः सुतेष्टुभिरिति॥ अश्वं सप्तमी॥ कामतः शूद्रयोहंत्री॥ आरो भौमः॥ अग्निपित्र्यका
लभानि कृत्तिका मघा भरण्याख्यानि नक्षत्राणि॥ पिंडदानग्रहणं श्राद्धोपलक्षणमेव॥ एकमूलकल्पना
लाघवात्॥ अस्यापवादः प्रयोगपारिजातोदाहृते संग्रहवचने॥ अमापाते भरण्यां च द्वादश्यां पक्षमध्य
के॥ तिथिवारं च नक्षत्रं योगं च न विचारयेदिति॥ मृततिथिसमानजातीयायामपि चतुर्दशीभिन्नायां ति
थौ निषेधप्रयोजकयुक्तायामपि यावत्संभवं सिद्धमहालयश्राद्धमाचरंति॥ केचित्तु॥ आधुनिकग्रंथे
नु च नान्यपि लिखितानि॥ नागरखंडे॥ आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे॥ मृताहनि पितुर्यो वै श्रा
द्धं दास्यति मानवः॥ तस्य संवत्सरं यावत्संतृप्ताः पितरो ध्रुवं॥ कात्यायनः॥ या तिथिर्यस्य मासस्य मृताहस्तु प्र
वर्तते॥ सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः॥ तथा॥ आसां के पक्षमध्ये तु करोत्येकदिने यदा॥ निषिद्धेपि
हि कुर्वीत पिंडदानं यथाविधीति॥ तत्रापि मार्कंडेयः॥ कन्यागते सवितरि दिनानि दशपंच च॥ पार्वणेनेव विधि

हृ०
॥१८॥

नापिंडदानंयथाविधीति॥तथामार्कंडेयः॥कन्यागतेसवितरिदिनानिदशपंचच॥पार्वणेनैवविधिनाश्रा
द्धंतत्रविधीयते॥एतेषुविवाहेविहितेमासस्यात्मजेषुवर्षाद्यैवहि॥सपिंडापिंडनिर्वापंमौंजीबंधेषडब्दहीतिविवा
हादनंतरंपिंडदाननिषेधोज्योतिःपराशरेणोक्तः॥तस्यापवादः॥स्मृतिसंग्रहे॥महालयेगयाश्राद्धेमा
तापित्रोर्मृतेहनि॥पत्युःकस्यापिप्रत्यस्यसपिंडीकरणेतथा॥एतेषुहापिकुर्वीरन्पिंडनिर्वपणंसुताइति॥
सन्यासिनांतुमहालयश्राद्धंद्वादश्यांकर्तव्यं॥यतीनांचव्रतस्थानांवैष्णवानांविशेषतः॥द्वादश्यां
विहितंश्राद्धंकृष्णपक्षेविशेषतइतिपृथ्वीचंद्रोदयेसंग्रहोक्तेः॥इदंचान्येनैवकर्तव्यं॥एतादृशंचसपिंडंच
गयाश्राद्धंमहालयं॥आपन्नोपिनकुर्वीतश्राद्धमामेनकर्हिचिदितिस्मृतिदर्पणेगालवोक्तेः॥अथान्ये
वताः॥पितरौयत्रपूज्यंतेतत्रमातामहाअपि॥तथा॥अन्वष्टकासुवृद्धौचप्रतिसंवत्सरंतथा॥महालये
गयायांचसपिंडीकरणात्पुरा॥मातुःश्राद्धंपृथक्कुर्यादन्यत्रपतिनासह॥हेमाद्रौ॥महालयेगयाश्राद्धेवृ
द्धौचान्वष्टकासुच॥नवदैवत्यमत्रेष्टंशेषंस्यात्पौरुषंविदुः॥सपत्नमातुःमातामहात्रासहैकतंत्रेणहिपित्र्यं
श्राद्धवत्॥निगमे॥महालयेगयाश्राद्धेश्राद्धेचान्वष्टकेसुच॥तेयद्वादशदैवत्यंतीर्थेप्रोष्ठपदासुच॥
तथाहेमाद्रौ॥उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः॥श्वशुरभ्रातृतत्पुत्रर्त्विक्शिष्यासपा
बकाः॥भगिनीस्वामिदुहितृजामातृभगिनीसुताः॥पितरौपितृपत्नीनांपितुर्मातुश्चयास्वसा॥
सखिद्रव्यदमित्रव्याधोस्त्रीश्चैवमहालये॥एकोद्दिष्टविधानेनपूजनीयाःप्रयत्नतइति॥तातां

॥१८॥
र०

बेतिसंग्रहवाक्यंतुऋषिवचनासंवादान्नादृतं॥अत्रप्रत्येकोद्दिष्टंब्राह्मणभेदइतिमुख्यःपक्षः॥अ
चतुर्विंशतिमते॥एकस्मिन्ब्राह्मणेसर्वानाचार्यादीन्प्रपूजयेत॥दशाहादृचावापिंडन[illegible]करणं
नतु॥ ॥विधवायास्तुविशेषःस्मृतिसंग्रहे॥ ॥चत्वारिपार्वणानीहविधवायाःसदैवहि॥स्वभर्तृश्वश्रुरादी
नांमातापित्रोस्तथैवच॥ततोमातामहानांचश्राद्धंदानमुपक्रमेत॥तथा॥श्वश्रूणांचविशेषेणमातामह्या
स्तथैवचेति॥अत्राकौस्मृतिरत्नावल्यां॥स्वभर्तृप्रभृतित्रिभ्यःस्वपितृभ्यस्तथैवच॥विधवाको
रयेच्छ्राद्धंयथाकालमतंद्रिता॥विधवाप्राःस्वयंसंकल्प्यसत्यान्यद्वाराकारयेदित्युक्तंप्रयोगपारिजाते॥अ
त्रचैकःपाकःवैश्वदेवंतंत्रं॥एकोद्दिष्टेषुपाणिहोमः॥पुरूरवार्द्रवकसंज्ञकौविश्वेदेवौ॥यत्तु॥अपिक
न्यागतेसूर्येश्राद्धंतुपरिलोपनाविद्यादिपुराणवचनंतत्काम्यबुध्याक्रियमाणमहालयश्राद्धविष
यमितिमदनरत्नमदनपारिजातादावुक्तं॥अत्रचप्रतितंत्रंप्रयोगभेदाद्दक्षिणाभेदः॥यत्तुहेमाद्रिणाभ्या
सपक्षेतेदक्षिणादानभिन्नमुक्तंतत्कर्मैक्येपिप्रतिपदिनंप्रयोगभेदाद्दक्षिणायाश्चप्रयोगांगत्वादयु
क्तं॥एतच्चगुर्विणीपतिनापिंडरहितंकार्यं॥तथाचदक्षः॥मुंडनंपिंडदानंचप्रेतकर्मचसर्वशः॥नजी
वत्पितृकःकुर्याद्गुर्विणीपतिरेवचेति॥जीवत्पितृकस्यचान्वष्टक्यमातृपार्विकोदिष्टंचनाद्यव
ति॥अपिंडकश्राद्धविशेषमाहछागलेयः॥पिंडोयत्रनिवर्त्ततेमन्वादिषुकथंचन॥सांकल्पंतुतो
कार्यंनियमाद्ब्रह्मवादिभिः॥ ॥श्राद्धांगतर्पणंतुपक्षश्राद्धश्राद्धोत्तरंसद्यएवमहालयेतुपरदिने॥

उ२

तदुक्तं नारदीये।। पक्षश्राद्धं यदा कुर्यात्तर्पणं तु दिने दिने।। सकृन्महालये चैव परेहनि तिलोदकमिति।। प्रयो
गपारिजाते गर्गः।। हस्ते भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत्।। पितॄणां प्रत्यहं कार्यं निषिद्धेपि च तर्पणं।।
एतच्च श्राद्धं नित्यं।। आषाढ्याः पंचमे पक्षे यः श्राद्धं न करिष्यति।। शाकेनापि हि विप्रोपि सोन्त्यजत्वमुपे
ष्यति।। आसने शयने भोज्ये स्पर्शने भाषणे तथा।। तेन सार्द्धं करिष्यंति ते पापतरा नरा इति नाग
रखंडेऽकरणे प्रत्यवायश्रवणात्।। काम्यं च।। पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा।। प्राप्नोति पं
चमे दत्वा श्राद्धं कामांश्च पुष्कलानिति कार्ष्णाजिनिवचनात्।। पितृमरणप्रथमाब्दे तु दत्तादत्ते।। अ
ब्दभरण्यां श्राद्धं प्रशस्तं।। भरणी पितृपक्षे तु महती परिकीर्तिता।। तस्यां श्राद्धं कृतं येन स गयाश्रा
द्धकृद्भवेदिति मात्स्यात्।। षष्ठ्यां चंद्रोदये।। नभस्यापरपक्षस्य द्वितीयायां दियाम्पते।। तृतीयायाश्च निता
भिः सहिता प्रीतिदा पितुरिति।। ।। अस्मिन्नेव पक्षे कपिलाषष्ठी।। ।। तदुक्तं वाराहे।। नभस्यस्यासितप
क्षे स्याद्रोहिणीपातभसुतैः।। युक्ता षष्ठी पुराणज्ञैः कपिला परिकीर्तिता।। व्रतोपवासनियमैर्भास्करं तत्र
पूजयेत्।। कपिलां वा द्विजाग्र्याय दत्वा क्रतुफलं लभेदिति।। अत्रैव हस्तार्क कालातिन्याप इति निर्ण
यामृते।। ।। इयमेव चंद्रषष्ठी।। ।। तदुक्तं भविष्ये।। तद्भाद्रपदे मासि षष्ठ्यां पक्षे सितेतरे।। चंद्रषष्ठी
व्रतं कुर्यात्सर्वबंधैः प्रमुच्यते।। चंद्रोदये यदा षष्ठी पूर्वा वाप्यपरेहनि।। चंद्रषष्ठ्यां सिते पक्षे सैवोपोष्या

प्रयत्नत इति।। तत्रैवाष्टम्यामाश्वलायनेन माध्यावर्षसंज्ञं श्राद्धमुक्तं।। एतेन माध्यावर्षं प्रौ
ष्ठपद्या अपरपक्ष इति।। इदं च सप्तम्यादिषु त्रिष्वहःसु अष्टम्येव कार्यमिति वृत्तिदत्तः।। हरयुक्तं मा
घ्यावर्षसु भवत्रयोदशी श्राद्धं त्रिष्वप्याचरव्यो।। ।। अत्रैवाष्टम्यां महालक्ष्मीव्रतसमापनं।। ।। तत्र
चंद्रोदयव्यापिनी ग्राह्या।। तत्काले चंद्रार्घ्यविधानात्।। चंद्रोदयव्रते तत्वे च चंद्रोदयवृत्तौ चैव ति
थिः स्तात्कालिकी स्मृतेति वचनात्।। उभयत्र चंद्रोदये सत्वे असत्वे वा परच्छोत्वा स्तूर्वा।। यदि तु परदि
ने चंद्रोदयोत्तरं त्रिमुहूर्ताधिकास्ते रेव।। पूर्वा वा परविद्धा वा ग्राह्या चंद्रोदये तथा।। त्रिमुहूर्तापि सा ग्राह्या
परतश्चोर्ध्वगामिनीति पुराणसमुच्चयवचनात्।। अहोरात्रमतिक्रम्य वर्तते योत्तरा तिथिः।। तदा त
स्यां तिथौ कार्यं महालक्ष्मीव्रतं सदेति वचनाच्च।। ।। अत्रैव नवम्यामन्वष्टकाश्राद्धं।। ।। तत्र कात्यायनः।।
अन्वष्टकासु नवभिः पिंडैः श्राद्धमुदाहृतं।। पित्रादि मातृमध्यं च ततो मातामहांतकं।। हेमाद्रौ ग
र्ग्येयः।। केवलास्तु क्षये कार्याः द्वावाद्यौ प्रकीर्तिताः।। अन्वष्टकासु मध्यस्था नोत्स्याः कार्याः केव
लेनेति।। दीपिकायां तु।। मातुः श्राद्धं पृथक्कुर्यादित्युक्तं।। निर्णयामृते मैत्रायणीयपरिशिष्टे।।
अन्वष्टक्यायां माहोससीयच्च म्येतेहनि।। मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवतीति।। यद्यपि जीव
पितृकस्यपंचाप्यन्वष्टका नित्यैव तथाप्याचारात्साग्निकस्येयमावश्यकीति केचित्।। मातामह
रणोत्तरं नवम्यां क्रियमाणमान्वष्टक्यश्राद्धं प्रतिपदि क्रियमाणमातामहश्राद्धं च महालयापरपक्षोन

हु०
॥२०॥

मित्युपेतिकालेतत्यविवेचनेसोपपत्तिकमुक्तं॥अत्रस्वमातरिजीवन्त्यामपिसपत्नमातुःश्राद्धघात॥
सर्वासामेवमातॄणांश्राद्धंकन्यागतेरवौ॥नवम्यांहिप्रदातव्यंसर्वलब्धवराहिताइति॥मिलिखितंनव
चनेसर्वासांमातॄणामुक्तेः॥अत्रसर्वासांनामनिर्देशेनएकोद्दिष्टंपिंडश्च॥नामिकेपतुद्विवचनोप्रयोग दि ७
इतिपत्तिकारः॥भर्तुर्मरणोत्तरंमातुःश्राद्धंनेकापिश्राद्धंनवम्यांकुर्यात्तन्मतेभर्तारिलुप्यत
इतिवचनादितिकेचित॥अन्येतुएतद्वचनस्येनिर्मूलत्वात्कर्तव्यमित्याहुः॥मातामहश्राद्धस्य॥
तपितृकेणपित्रेश्राद्धादिनपर्वध्यं॥श्राद्धमातामहात्तस्मोपिसपुत्रादिनेतोन्येकर्तव्यमित्याहुः॥सर्व
दैनकालतत्वविवेचनेस्पष्टं॥इदंचजीवत्पितृकेणापिसपिंडकंकार्यं॥हेमाद्रौविष्णुधर्मोत्तरे॥अन्वष्टक्यं
श्राद्धे० स्वस्त्रीणांकार्यंतथैवस्वेष्टुपक्षेप्यपिंडनिर्वपणंकार्यमित्युक्तत्वात्॥अत्रातिदेशाद्विपिंडदानेप्राप्तेजीवत्पि
तृकस्यादिप्रयुक्तनिषेधप्रतिप्रसवार्थवचनं॥अत्रसुवासिनीभोजनमुक्तंमार्कंडेयपुराणे॥मातुःश्रा
द्धेतुसंप्राप्तेस्वान्ययोःसहभोजनं॥सुवासिन्येप्रदातव्यमितिमातातपोऽब्रवीत्॥भर्तृरणेष्वपितानारीश्र
द्धेहनवाम्नतः॥तस्योस्थानेनियुंजीतविप्रैःसहसुवासिनिमिति॥॥अत्रैवमदनलालवाक्यं॥॥
स्त्रीश्राद्धेपुत्रदेयात्सुरत्नकाराञ्येयोषितः॥मंजीरपोरवलाहामकर्णिकाकंकणादयइति॥॥अ
त्रैवत्रयोदश्यांश्राद्धंमहाफलं॥॥अपायुक्तौयांतुब्रातिप्रयासैः॥॥तत्प्रकारश्चदेवीपुराणे॥त्रयो
दश्या॥ ॥२०॥
२०

नतथातुष्यतेराजन्होमदानजपैर्नतु॥कुमारीभोजनेनात्रदेवीक्षिप्रंप्रसीदति॥॥अत्रनवरा
त्रे॥॥प्रशस्ताअपरादेसर्वासांकुमारीणांच्चसर्वासुतिथिषुतदेरंभेतत्रताःप्राशनेस्थिताः॥॥पूजयि
त्वाधपुष्पैश्चवस्त्रादिश्चापिमनोरमैः॥पूजयित्वाविधिनाभोजनंतासुदापयेत॥एवंलंगुगंस
पिर्दधिक्षीरंस[illegible]पायसंकं॥तासांदद्यंकुमारीणांनानेनुजापयेतुताः॥पानीयंयथावितंदेयमन्नंवा
याचितंशुभं॥तास्तस्मात्सर्वातदानंवमन्नंददेत॥ओच्चम्पवासेतान्द्रयालबाक्षंतव्य
मित्युत॥दातुःशिरसिदातव्याःकन्यकाभिरथाक्षता॥तेनापिप्रणिपातस्तुकर्तव्यंभक्तिपूर्वकं॥ ध्यो
अनेनविधिनाराजन्देवीक्षिप्रंप्रसीदति॥ददातिविविधान्कामान्मनोरथान्सुराधिप॥राज्यं
दत्वाततःपश्चाद्द्यलोकंचगच्छतीति॥हेमाद्रि॥एकैकांपूजयेत्कन्यामेकैकांवर्धयेत्तथैवच॥द्वि
गुणंत्रिगुणंवापिप्रत्येकंनवकंवरं॥नवभिर्लभतेभूमिमैश्वर्यंद्विगुणंनतु॥एकवर्षाल्पमेमनसेस
मेकैकेनश्रीयंलभेत॥एकवर्षतुयाकन्यापूजार्थंतांविवर्जयेत॥गंधपुष्पफलादीनांप्रीतिस्तु
स्यानविद्यते॥द्विवर्षकन्यामारभ्यदशावर्षावधिक्रमात॥तासांचक्रमेणकुमारिका॥त्रिमूर्तिः॥
कल्याणी॥रोहिणी॥कालीअत्रपञ्चमासेपिश्राद्धंकार्यं॥अनन्यगतिकत्वात्सप्तमपात्रयोदश्यांश्रा
ल्याः॥चंडिकायाः॥शांभव्याः॥दुर्गायाः॥सुभद्रायाः॥

सं०
॥२१॥
प३

द्रं प्रत्युपस्थितिहेतुकं॥ अनन्यगतिकत्वेन कर्त्तव्यं स्यान्मलिम्लुचे इति काठकगृह्यपरिशिष्टोक्तेः॥ इदं च
युगादिविशेषप्रयुक्तं तत्तु पिंडरहितं कार्यं॥ अयनद्वितये श्राद्धं विषुवद्वितये तथा॥ युगादिषु च कर्त्तव्यं
पिंडनिर्वपणादृते इति वचनात्॥ एतच्च पुत्रवतापुत्रेण तद्भ्रात्रा न कार्यं॥ अविभक्तैरपि पृथक्कार्यं॥ तथा
च हेमाद्रौ॥ विभक्ता वाऽविभक्ता वा कुर्युः श्राद्धं पृथक् सुताः॥ मघासु च ततोन्यत्र नाधिकारः पृथ
ग्विनेति॥ ॥ नित्यं वात्र श्राद्धं॥ ॥ प्रोष्ठपद्यामतीतायां तथा कृष्णत्रयोदशी॥ प्राप्य पक्षमघ्य॥ एतानि श्राद्ध
कालानि नित्यानि ह प्रजापतिः॥ श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते इति विष्णुधर्मोत्तरात्॥ ॥
इयमेव योगविशेषेण गजच्छाया॥ तदुक्तं ब्राह्मे॥ योगो मघात्रयोदश्यां कुंजरच्छायसंज्ञकः॥ भवे
न्मघायां संस्थश्चन्द्रः शीतांशुर्न्यर्के करे स्थितस्तदेति॥ ॥ आश्विने चैव पक्षे तु दर्शे मरणमृतानां श्राद्धं कार्यं॥ त
था च मरीचिः॥ विषसर्पश्वापदादितिर्यग्ब्राह्मणघातिनां॥ चतुर्दश्यां क्रिया कार्या अन्येषां तु विगर्हि
तेति॥ नागरखंडे॥ अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा॥ उपसर्गमृतानां च विषमृत्युमुपेयुषां॥
वह्निना च प्रदग्धानां जलमृत्युमुपेयुषां॥ सर्पव्याघ्रहतानां च शृंगैरुद्बंधनैरपि॥ श्राद्धं तेषां प्रकर्त्त
व्यं चतुर्दश्यां नराधिपेति॥ मार्कंडेयपुराणे॥ युवानः पितरो यस्य मृताः शस्त्रेण वा हताः॥ तेन का
र्यं चतुर्दश्यां तेषां तृप्तिमभीप्सतेति॥ प्रायोनशनशस्त्राग्निविषोद्बंधनिनां तथा॥ चतुर्दश्यामेव श्राद्ध
मिति ब्रह्मपुराणात्॥ ॥ युद्धमृतानां च॥ ॥ प्रीयंते पितरस्तस्य स्वयं श्राद्धं हतारणेपि तिथ्यनुस्मरणात्॥ एत

॥२१॥
सं०

च्छस्त्रघातादिनिमित्तं चतुर्दश्यां श्राद्धं पित्रादीनामप्येकोद्दिष्टमेव भवति॥ न तु पार्वणं तथा च गार्ग्यः॥ च
तुर्दश्यां तु यच्छ्राद्धं सपिंडीकरणात्परं॥ एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिन इति॥ पित्रादिषु त्रिष्वपि शस्त्र
तेषु॥ सर्वेषामेकोद्दिष्टान्येव कार्याणि॥ पार्वणविधायकवचनाभावात्॥ यत्तु॥ पित्रादयस्त्रयो यस्य स्युः शस्त्रघा
ताहिजिहिताः॥ सम्भूते पार्वणं कुर्यादिति द्विकोद्दिष्टपक्षे कृष्णपक्षमिति वक्तुं नैतत्प्रामाणिकं ग्रंथेष्वदर्शनान्नाकरं॥
हतस्त्वैकोद्दिष्टं सदैवं कार्यं॥ प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टविधानतः॥ देवपूर्वं तु तच्छ्राद्धं पितृणामक्षयं भवेदिति
योगपारिजातोदाहृतवचनात्॥ यस्तु तस्यामेव चतुर्दश्यामजस्य स्वक्षयाहनिमित्तं॥ श्राद्धं पार्वणविधिनैव कर्त्तव्यं॥
अमावास्याक्षयो यस्य प्रेतपक्षे यदा पुनः॥ पार्वणं तस्य कर्त्तव्यं नैकोद्दिष्टं कदाचनेति विज्ञानेश्वरधृतस्मरणात्॥
॥ ॥ अमावास्यायां विशेषमाह अपरार्के यमः॥ हंसे करस्थिते या तु अमावास्या करान्विता॥ सा ज्ञेया कुंजर
छायाइति बोधायनोब्रवीदिति॥ ॥ इति भाद्रपदकृत्यानि॥ ॥ आश्विनशुक्लप्रतिपदि जीवत्पितृकेण मातामहश्रा
द्धं कार्यं॥ ॥ तदुक्तं हेमाद्रौ॥ जातमात्रोपि दौहित्रो जीवत्यपि च मातुले॥ कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सि
त इति॥ इयं च संगवव्यापिनी ग्राह्येति निर्णयदीपे उक्तं॥ प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणं॥ श्राद्धं माता
महं कुर्यात्सपिता संगवे स्थित इति॥ सपितेति विशेषणात्॥ जीवत्पितृकस्यैवाधिकारः॥ इदं त्वमुंडनं पिंडदान
चेति दक्षवचनेन जीवत्पितृकप्रतिपिंडदाननिषेधादत्र एकोद्दिष्टे विशेषवचनाभावात्सपिंडरहितं कार्यमिति के
चित्॥ अन्ये तु न जीवत्पितृकस्य प्रतिपिंडदानमात्रमनेनान्निषिध्यते॥ किंतु दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपाक्षिकं॥
न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणमिति वचनेनैकवाक्यतया श्राद्धमेव निषिध्यते तद्वाक्यगतदर्श

दि॰ ॥२२॥

दिपदमुपलक्षणं ॥ एवं च तन्त्रे क्रियोपवचनमासंश्राद्धं वा पिंडमेव भवतीत्याहुः ॥ ॥अस्यामेव नवरात्रारं
भः ॥ ॥तत्र व्रतस्वरूपमुक्तं विष्णुधर्मोत्तरे ॥ एवं च विंध्यवासिन्यां नवरात्रोपवासतः ॥ एकभक्तेन नक्तेन स्वशक्त्या या
चितेन वा ॥ पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ॥ गृहे गृहे शक्तिपरैर्ग्रामे ग्रामे वने वने ॥ स्नातैः प्रमुदितैर्हृष्टै
र्ब्राह्मणैः क्षत्रियैर्नृपैः ॥ वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ॥ स्त्रीभिश्च कुरुशार्दूल तद्विधानमिदं शृणु भि
ति ॥ देवीपुराणेपि ॥ कन्यासंस्थे रवौ शुक्लामाश्विने प्राप्य नंदिकां ॥ अयाचीत्यथवैकाशी नक्ताशी वाथवा पदः ॥
प्रातःस्नायी तथा मंत्र्य कुमारीभोजयेन्मुदा ॥ वस्त्रालंकारदानैश्च संतोष्याः प्रतिवासरं ॥ बलिं च प्रत्यहं दद्या
द्देवं ने मासपापवत् ॥ त्रिकालं शंभयेद्देवी जपस्तोत्रपरायणः इति ॥ ॥अत्र देवीपूजा प्रधानं ॥ ॥उपवासा
दिकं तु ॥ पूजयित्वाश्विने मासि विशोको जायते नरः इत्यादौ पूजाया एव फलसंबंधादिति ॥ अत्र प्रतिपदः ख
ण्डत्वे केचित्तावत्पूर्वविद्धां ग्राह्येत्याहुः ॥ तथा हि स्कांदे मार्कंडेयदेवीपुराणयोः ॥ पूर्वविद्धा तु या शुक्ला भवेत्प्रति
पदाश्विनी ॥ नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता ॥ देशभंगो भवेत्तत्र दुर्भिक्षं चोपजायते ॥ नंदायां दर्शयु
क्तायां यत्र स्यान्मम पूजनं नेति ॥ तथा ॥ अमायुक्ता न कर्तव्या प्रतिपत्पूजने मम ॥ मुहूर्तमात्रा कर्तव्या
द्वितीयादिगुणान्विता ॥ तथा ॥ न दर्शकलया युक्ता प्रतिपच्चंडिकार्चने ॥ उदये द्विमुहूर्तापि ग्राह्या सा
द्यगामिनीति ॥ शुद्धाधिका तु पूर्वैव ग्राह्या संपूर्णत्वाद्मायोगाभावाच्च ॥ यदा त्वमाविद्धा प्रतिपत्परदि

॥२२॥
रा

८३

ने नास्ति तदा विद्धापि ग्राह्या ॥ एतद्विषयाण्येवामायुक्ता कर्तव्येति नृसिंहप्रसादोदाहृतवचनानीति ॥ मा
तामहचरणैस्तु माधवहेमाद्र्युक्तनक्तन्यायेन तदुदये घेनरलंग प्रतिपत्प्रदोषव्यापिनी ग्राह्येत्युक्तं ॥ नक्तव्रत तु
चनेनैक्तभोजनरूपत्वोत ॥ तत्स्वपासिकत्वात्पुंगवाच्च ॥ किंतु प्रतास्वरूपस्य प्रधानस्य नक्तकालसाध्यत्वात ॥ तत्र
निर्णीतत्वं प्रतिभूतानिर्णो नक्षयः कालस्य घटतया ॥ सामान्यवचनात् ॥ आश्विने मासि मेघांते प्रतिपद्यातिथिर्भवेत् ॥
तस्यां नक्तं प्रकुर्वीत रात्रौ देवीं प्रपूजयेत् ॥ रात्रिव्रतमिदं देवि सर्वपापप्रणाशनं ॥ रात्रिव्रतमिदं तस्य रात्रौ कर्तव्य
तेष्यतद्दर्शादिदेवीपुराणादिवचनेभ्यश्चावगम्यते ॥ एवं च पूजारूपस्य प्रधानस्य रात्रिकालव्यवस्थिते कर्मणोय
स्य यः कालः इति वचनात्प्रदोषव्यापिनी प्रतिपन्नवरात्रे तु ले ग्राह्या ॥ तत्र पूर्वदिन एव प्रदोषव्याप्तौ पूर्वा दिनद्वये तद्व्या
प्तौ उत्तरा ॥ दिनद्वये तद्व्याप्त्यभावे तु उत्तरैव ॥ सायाह्नस्य मौण कालव्याप्तेरभावात् ॥ यत्तु ॥ आद्याः षोडश नाडिका
स्त्याज्याः षोडशाद्यास्तु देवतागमपुराणे च कर्तव्यं शुभसंततिकांक्षिभिरिति वचनं ॥ तथा ॥ षोडशना
डिका लब्ध्वा यः कुरुते नरः ॥ कलशस्थापनं तत्र अरिष्टं जायते ध्रुवमिति वचनांतरैकवाक्यतया कल
शस्थापनविषयं ॥ एवं द्वितीयाविद्धप्रतिपद्विधायकानि ॥ अमायुक्तनिषेधकानि वचनानि क
लशस्थापनविषयाण्येव ॥ अमायुक्ता सदा चैव प्रतिपन्निंदिता तथा ॥ अत्र चेत्स्थापयेत्कुंभं दुर्भिक्षं जायते
ध्रुवं ॥ प्रतिपत्सद्वितीया तु कुंभारोपणकर्मणि तिरुद्रयामलवचनात ॥ यद्यपि ॥ प्रारब्धं नवरात्रं स्याद्द्विसा
वित्रां चैव धृतिमितिवचनेन तद्दिवा ॥ त्योद्वेधेपि संक्रांतेति प्रतिपच्चंडिकार्चने ॥ तयोरंते विधातव्यं कलशारोपणं
गृह्येति वचनात्कलशस्थापने विषयभेदः ॥ अत्र विशेषमाह दुर्गोत्सवे ॥ कात्यायनः ॥ प्रतिपद्याश्विने मासि

ऽर्चे वैधृतिचित्रयोः ॥ आद्यपादौ परित्यज्य प्रारभेन्नवरात्रकं ॥ अभिषेक्यं चित्रावैधृतिसंयुक्ता प्रति-
पच्छेद्वेत्स्यात् ॥ त्याज्यास्त्वाद्यास्त्रयो भागास्तुरीयांशे तु पूजनमिति ॥ तथा ॥ न रात्रौ स्थापनं कार्यं न च कुंभा-
भिषेचनं ॥ विष्णुधर्मे ॥ सूर्योदयमारभ्य यावत्तु दश नाडिकाः ॥ प्रातःकाल इति प्रोक्तः स्थापनारोपण-
योः ॥ इति रुद्रयामले ॥ स्नानं मांगलिकं कृत्वा ततो देवीं प्रपूजयेत् ॥ शुभाभिर्मृत्तिकाभिश्च पूर्वं ह्रस्वां तु वेदि-
कां ॥ यवान्प्ररोपयेत्तत्र गोधूमैश्चापि संयुतान् ॥ तत्र संस्थापयेत्कुंभं विधिना मंत्रपूर्वकं ॥ सौवर्णं राजतं वापि
ताम्रं मृन्मयमेव तु वेति ॥ देवीपूजा च जयंतीमंत्रेण कार्या ॥ जयंती मंगला काली भद्रकाली कपालिनी ॥ दुर्गा क्ष-
मा शिवा धात्री स्वाहा स्वधा नमोस्तु ते ॥ अनेनैव तु मंत्रेण जपहोमादि कारयेदिति देवीपुराणात् ॥ ॐकालिंगको
वैदिके आगमिके वा ॥ तल्लिंगैः सर्वदेवाः समाहितः इत्यग्निपुराणात् ॥ प्रणवादि चतुर्थ्यंतं नमोंतं नाम वा ॥
नाम्ना सर्वं समापयेदिति साधारणं वा स्यात् ॥ पूजा च षोडशोपचारैः पंचोपचारैर्वा ॥ जन्यैश्च राजोपचारैः
छत्रचामरादिभिः सा च त्रिकालं प्रत्यहं विधिविधिना पूजनं तत्र स्वमार्कंडेयपुराणादिगतं देवीमाहात्म्यं पठेच्छृ-
णुयाद्वा ॥ माहात्म्यं भगवत्याश्च पुराणादिषु कीर्तितं ॥ पठेच्च शृणुयाद्वापि सर्वकामसमृद्धये इति वचनात् ॥ तथा ॥
एकोत्तराभिवृद्ध्या तु नवमीं यावदेव हि ॥ चंडीपाठं जपेच्चापि जापयेद्वा विधानत इति ॥ श्रवणं ब्राह्मणाद्देव
र्तव्यं ॥ वाचकं ब्राह्मणं विद्वान्नान्यवर्णं तमादरात् ॥ इति भविष्यपुराणात् ॥ पौराणस्तोत्रपाठश्च नारायणा-
दीन्नमस्कृत्य कर्तव्यः ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीर-
येदिति वचनात् ॥ जयशब्दार्थश्च भविष्ये ॥ अष्टादशपुराणानि रामस्य चरितं तथा ॥ विष्णुधर्मादिशास्त्राणि

^पूजयेन्मंत्रैः

दीनि धर्माश्च भारत ॥ कार्ष्णं च पंचमो वेदो यन्महाभारतं स्मृतं ॥ सौराश्च धर्मा राजेंद्र मानवोक्ता मही-
पते ॥ जयेति नाम एतेषां प्रवदंति मनीषिण इति ॥ पाठप्रकारश्च मत्स्यसूक्ते ॥ प्रणवमादौ दद्यात् स्तोत्रं वा संहि-
तां पठेत् ॥ अंते च प्रणवं दद्यादित्युवाचादिपूरुषः ॥ सर्वत्र पाठे विज्ञेयो ह्यन्यथा विफलं भवेत् ॥ शुद्धेनानन्यचि-
त्तेन पठितव्यं प्रयत्नतः ॥ नैकापि स्तकमत्र साधूपं स्तोत्रस्य वाचनं ॥ आधारे स्थापयित्वा तु पुस्तकं पूजयेत्सु-
धीः ॥ हस्तसंस्थापनादेव यस्मादर्धफलं भवेत् ॥ स्वयं वा लिखितं यत्तु रतिना लिखितं च यत् ॥ अब्राह्मणेन लि-
खितं तच्चापि विफलं भवेत् ॥ ऋषिच्छंदादिकं न्यस्य पठेत्स्तोत्रं विचक्षणः ॥ स्तोत्रेण दृश्यते यत्र प्रणवन्यासमा-
चरेत् ॥ संकल्पितस्तोत्रपाठे संख्याहतो पठेत्सुधीः ॥ अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन ॥ इति विराम
मध्ये तु अध्यायादिं पठेत्पुनरिति ॥ दुर्गामंत्रं वैदिकमागमिकं वा जपेत् ॥ [illegible] ॥ दुर्गां ततो जपेन्मंत्रमेका-
ग्रचित्तः समाहितः इति देवीपुराणात् ॥ कुमारीपूजनं च प्रत्यहं यथाशक्ति एकैकवृद्धिक्रमेण कार्यं ॥ तत्प्रकारश्च दे-
वीपुराणे ॥ ब्रह्मोवाच ॥ न तथा तुष्यते राजन् होमदानजपैर्न तु ॥ कुमारीपूजनेनात्र यथा देवी प्रसीदति ॥ अ-
नवरात्रे ॥ प्रक्षाल्य पादौ सर्वासां कुमारीणां च वासव ॥ सुलिप्ते भूतले रम्ये तत्र ता आसने स्थिताः ॥ पूजयेत्
धूपपुष्पैश्च वस्त्रैश्चापि मनोरमैः ॥ पूजयित्वा विधानेन भोजनं तासु दापयेत् ॥ खंडलड्डुगुडं सर्पिर्दधिक्षीरं
समाक्षिकं ॥ तासौ दयं कुमारीणां दानेन भुंजापयेत्सुताः ॥ पानीयं चापि तद्देयमन्नं यथापि तद्भुतं ॥ तास्तस्तोषिता-
मदासवासितदास्याचमनेन दद्यात् ॥ आचम्य चाक्षतान्दद्यात्तु पार्श्वंतव्यमित्युत ॥ ततः शिरसि दातव्याः कन्यकाभिर-
क्षताः ॥ तेनापि प्रणिपातस्तु कर्तव्यो भक्तिपूर्वकः ॥ अनेन विधिना राजन्देवी हि संप्रसीदति ॥ ददातिति वि-

कु
॥२५॥
३के

न्कामान्मनोभीष्टान्सुराधिप ॥ राज्यं स्त्वा ततः पश्चाद्देवलोकं च गच्छतीति ॥ स्कांदे ॥ एकैकां पूजयेत्कं
न्यामेकवृद्ध्या तथैव च ॥ द्विगुणं त्रिगुणं वापि पूजयेन्नवकं वरं ॥ नवभिर्लभते भूमिपैश्वर्यं द्विगुणेन तु ॥
एकवृद्ध्याउ भोक्षेमम एकेन श्रीयं लभेत् ॥ एकवर्षा तु या कन्या पूजार्थं तां विवर्जयेत् ॥ गंधपुष्पफलादीनां प्री
तिस्तस्या न विद्यते ॥ द्विवर्षकन्यामारभ्य दशवर्षावधिकक्रमात् ॥ तासां च क्रमेण कुमारिका ॥ त्रिमूर्तिः कल्या
णी॰ रोहिणी॰ काली॰ चंडिका॰ शांभवी॰ दुर्गा॰ सुभद्रेति नामानि ॥ स्कांदे ॥ कुमारिका द्विवर्षा तु त्रि
वर्षा तु त्रिमूर्त्तिनी ॥ चतुर्वर्षा तु कल्याणी पंचवर्षा तु रोहिणी ॥ षड्वर्षा तु भवेत्कालो सप्तवर्षा तु चंडिका ॥ अ
ष्टवर्षा [illegible] शांभवी तु दुर्गा तु नवभिः स्मृता ॥ दशवर्षा सुभद्रेति नामभिः परिकीर्तिताः ॥ अत ऊर्ध्वं तु या कन्याः
सर्वकार्येषु वर्जिताः ॥ [illegible]क्रमेण फलं न्याह सतव ॥ दुःखदारिद्र्यनाशाय शत्रूणां नाशनाय च ॥ आयुष्म
बलवृद्ध्यर्थं कुमारीः पूजयेन्नरः ॥ [illegible] त्रिवर्गस्य फलोदये ॥ अपमृत्युव्याधिपीडः या
नापपन्नतेषां ॥ सौख्यधान्यनारोग्यपुत्रपौत्राभिवृद्धये ॥ कल्याणीं पूजयेच्छ्रीमान्नित्यं कल्याणवृद्धये ॥
आरोग्यसुखकामी च धनकामी तथैव च ॥ यशस्कामी नरो नित्यं रोहिणीं परिपूजयेत् ॥ विद्यार्थश्च जया
र्थश्च राज्यार्थश्च विनिश्चितः ॥ शत्रूणां च विनाशार्थं कालिकां पूजयेन्नरः ॥ संग्रामे जयकामी च चंडिकां
परिपूजयेत् ॥ दुःखदारिद्र्यनाशाय नृपसंमोहनाय च ॥ महापापविनाशाय शांभवीं च प्रपूजयेत् ॥ सर्वदु
ष्कर शत्रूणां उग्रसाधनकर्मणि ॥ दुर्गां दुर्गतिनाशाय पूजयेद्बलतो बुधः ॥ सौभाग्यधनधान्यादिवांछिता
र्थफलाप्तये ॥ सुभद्रां पूजयेन्मर्त्यो दारिद्र्यदासविद्रुरु ॥ पूजा मुक्ता स्मृतं चैव ॥ प्रातःकाले विरोधेणाहृतास्य
गोक्षिरोपलः ॥ आवाहयेत्ततः [illegible] मीमंत्रेणानेन भार्गव ॥ मंत्रोऽक्षरमयीं लक्ष्मीं मातृणां रूप ॥२४॥
२०

२ये

स्वरूपिणीं ॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं ॥ आवाहनमंत्रः ॥ ततः संपूजयेच्छ्रीमान्मं
त्रैरेभिः पृथक्पृथक् ॥ पूजामंत्राः ॥ जगत्पूज्ये सर्ववंद्ये सर्वेश्वरि शिवस्वरूपिणि ॥ इमां पूजां गृहाण कौमा
रि जगन्मातर्नमोऽस्तु ते ॥ कुमार्याः ॥ त्रिपुरां त्रिपुराधारां त्रिवर्गज्ञानरूपिणीं ॥ त्रैलोक्यवंदितां देवीं त्रिमू
र्तिं पूजयाम्यहं ॥ त्रिमूर्त्तेः ॥ कलात्मिकां कलातीतां कारुण्यहृदयां शिवां ॥ कल्याणजननीं नित्यं कल्याणीं पूज
याम्यहं ॥ कल्याण्याः ॥ अणिमादिगुणाधारामकाराद्यक्षरात्मिकां ॥ अनंतशक्तिकां लक्ष्मीं रोहिणीं पू
जयाम्यहं ॥ रोहिण्याः ॥ कामचारीं शुभां कांतां कालचक्रस्वरूपिणीं ॥ कामदां करुणोदारां कालीं संपूजया
म्यहं ॥ काल्याः ॥ चंडवीरां चंडमायां चंडमुंडप्रभंजिनीं ॥ पूजयामि सदा देवीं चंडिकां चंडविक्रमां ॥ चंडिकायाः ॥
सदानंदकरीं शांतां सर्वदेवनमस्कृतां ॥ सर्वभूतात्मिकां लक्ष्मीं शांभवीं पूजयाम्यहं ॥ शांभव्याः ॥ दुर्गमे दुस्त
२पि रे कार्ये भवदुःखविनाशिनीं ॥ पूजयामि सदा भक्त्या दुर्गां दुर्गतिनाशिनीं ॥ दुर्गायाः ॥ सुंदरीं स्वर्णवर्णाभां
सुखसौभाग्यदायिनीं ॥ सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहं ॥ सुभद्रायाः ॥ एवं प्रपूज्य चैनं कुपोलं कुमारी
णामयत्नतः ॥ कंचुकैश्चांबरैश्चैव गंधपुष्पाक्षतादिभिः ॥ नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्पायसादिभिः ॥
हीनाधिकांगीं कुष्ठादिविकारां कुरूपां तथा ॥ ग्रंथिस्फुटितगात्रांगीं रक्तपूयव्रणांकितां ॥ जात्यंधां केकरीं
काणां कुरूपां तनुरोमशां ॥ संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवां ॥ अरोगिणीं सुपुष्टांगीं सुरूपां
व्रणवर्जितां ॥ एकवंशसमुद्भूतां कन्यां सम्यक्प्रपूजयेत् ॥ ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजां ॥ ला

॥२६॥ मार्थे वैश्यवंशोत्थां स्तुतार्थे शूद्रवंशजां ॥ दारुणे वान्त्यजातीनां प्रत्यये विधिनानया इति ॥ क्वचित्तु
सर्वासामेकरूपस्य [illegible] ॥ मंत्रोक्तरूपमेव लक्ष्मीमारुह्य रूपधारिणी ॥ नवरूपा मिर्का साक्षात्क
न्यामावाहयाम्यहमिति ॥ अत्र वैरूपा रावणप्रयुक्ता रुद्रयामले ॥ नवैव तु वैरूपविधानं विप्रा सर्वान्प्रसादयेत् ॥
तेषां च वरणं कार्यं वैरूपा रावणार्थे तु इति ॥ तथा देवीपुराणे ॥ प्रतिपदि दिवसे कुर्यात् पूजाजनादिकं ॥ द्विगु
णं तद्द्वितीयेन्हि त्रिगुणं तत [illegible] इति ॥ नवमी तिथिपर्यंतं वृद्ध्या पूजाजपादिकमिति ॥ अत्र राज्ञो पूजा
दिकमन्येनैव कारणीयं ॥ स्वयं वा प्रत्यहं पूजयेत्स्वयं नयीत वेति देवीपुराणात् ॥ इदं च शुक्लाश्विनदीपिका ३६
फीन ६ शुक्ले तथा जीविसिंहस्य वव्हस्पुलो ॥ कापुन्वैव लग्ने वाचाप्रत्ययं कुर्यादेवमेव इति धर्मप्रदीपात् ॥ अ
त्र साक्ष्य स्यजाश्वपूजनमुक्तं ॥ मदनरत्ने दाहृते देवीपुराणे ॥ आश्वयुक्शुक्लप्रतिपत्स्वातियुक्ते शुभे ॥
पूर्वमुद्दिष्टः श्रवानाम प्रथमं स्वयमावहेत् ॥ तस्मात्सोश्वैन्नैरैस्तत्रस्त्योसोश्वयोश्विते ॥ पूजनीयाश्च तुरगा
नवमी यावदेव हि ॥ शांति स्वस्त्ययनं कार्यं तदा तेषां दिने दिने ॥ धान्यं भक्तं तथैककुष्ठत्वचा सिद्धार्थकास्तथा ॥
॥तु पंचरंगेण सूत्रेण कंठे तेषां बंधयेत् ॥ वायव्ये वीरूपेणैः सौरैः राजा तैर्मंत्रैः सर्वैर्देवैः ॥ वैश्वदेवैस्तथाग्नेयैर्मंत्रैः
कार्योदिने दिने ॥ तुरंगा रक्षणीयास्तु पुरुषैः शस्त्रपाणिभिः ॥ हरिप्रस्थितः केचित्तत्र नवबाश्चोः कर्यैवनीता
तथा ॥ ज्येष्ठा योगपुरा तत्र राजाश्वे प्रोपहाबलाः ॥ पृथिवीमवहन्पूर्वं सेनोत्थवनक्काननां ॥ कुमुदश्चैरावणः
पद्मः पुष्पदंतो धवामनः ॥ सुप्रतीकांजनो नीलस्तस्मान्नैतास्तत्रैव पूजयेत् ॥ राज्ञो दक्षासमारोप्य नव ॥२६॥
२.

प्यंतं च सर्वदेति ॥ प्रतिपदादिपूजाप्रकारः क्रियो वो भविष्ये ॥ केशसंस्कारद्रव्याणि प्रदद्यात्प्रतिपद्दिने ॥
पट्टडोरं द्वितीयायां सिंदूरालक्तकं तथा ॥ मधुपर्कं चतुर्थ्यां तु तिलकं नेत्रमंडनं ॥ पंचम्यामंगरागं [illegible] न्यस्यालं
करणानि च ॥ षष्ठ्यां बिल्वतरोर्बोधं सायं संध्यासु कारयेत् ॥ सप्तम्यां प्रातरानीय गृहमध्ये प्रवेशयेत् ॥ उपो
४म षणं तथाष्टम्यां मासरात्र्यावसूजनं ॥ नवम्यामुग्रचंडायाः पूजां कुर्यात्तु लितं तथा ॥ संप्रज्य प्रेषणं कुर्याद्दशम्यां
शाववरोत्सवैः ॥ अनेन विधिना यस्तु देवीं प्रीणयते नरः ॥ स सर्वं पालयेत्तं तु देवी सर्वापद्दिस्थितमिति ॥ अ
त्र स्त्रीणां विशेषः ॥ तत्र मनुः ॥ सुष्या लंकारवस्त्राणि गंधधूपानुलेपनं ॥ उपवासिनः क्षयंति दंतधावनमं
जनं ॥ हेमाद्रौ गारुडे ॥ गंधालंकारतांबूलपुष्पमालानुलेपनं ॥ उपवासे न दुष्यंति दंतधावनमंजनं ॥ अनंतरा तु पूजा
योगे पूजामन्येन कारयेत् ॥ एवमाशौचेपि ॥ सूतकाशौचे कुसमारभ्य मनेकाहं तु यत्कृतं ॥ काम्यकं तत्तु कुर्वी
तान्तु दानार्चनं जपं ॥ सूतकाहे तु यत्किंचिद्दानार्चनं तदीर्ति तेभवेत् ॥ सूतकानंतरे सम्यक् क्रियते कर्म व्यापतं दृते
रितिवचनात् ॥ आश्विनशुक्लपंचम्यामुपांगललिताव्रतं ॥ तत्र पंचमी सर्वविद्धैव ग्राह्या ॥ उपांगललिता
नामिति पुन्मुवो क्यात् ॥ अस्यामेव भुक्तो जागरणरूपत्वेन ॥ भुक्तो जागरणेनेति चैवं प्रायुपर्धिरोते तथा ॥
तापमते भुक्तं वै पुराप्रियोगो विनिष्पतेरतिहे प्राद्धिष्पतवचनाच्च ॥ अस्मिन्नस्त्रे मूलनक्षत्रे सरस्वती
स्थापनमुक्तं देवीपुराणे ॥ मूलेषु स्थापनं देव्याः पूर्वाषाढासु पूजनं ॥ उत्तरासु बलिं दद्यात्श्रवणेन विसर्जयेदि
ति ॥ रुद्रयामले ॥ मूलकाँस्ते सुराधीशा पूजनीया सरस्वती ॥ पूजयेत्सत्यहं देवया वदेत् श्रवणर्क्षकं ॥ नाध्याप

दु॰श्च॰
॥२६॥

रेनेच्छति खिन्नाधीप्रीतकरस्त्वन ॥ पुस्तके स्थापिते देवि विद्याकामो द्विजोत्तम इति ॥ षष्ठ्यादिप्रवेशोध्व
नः कालिकापुराणे ॥ बोधयेद्बिल्वशाखायां षष्ठ्यां देवीफलेषु च ॥ सप्तम्यां बिल्वशाखां तामाहृत्य प्रतिपू
जयेत् ॥ पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत् ॥ जागरं च स्वयं कुर्याद्बलिदानं महानिशि ॥ प्रभूतबलि
दानं च नवम्यां विधवच्चरेत् ॥ ध्यायेद्दशभुजां देवीं दुर्गामंत्रेण पूजयेत् ॥ विसर्जनं दशम्यां तु कुर्याद्वै शाबरो
त्सवैः ॥ धूलीकर्दमविक्षेपैः क्रीडाकौतुकमंगलैः ॥ भगलिंगाभिधानैश्च भगलिंगप्रगीतकैरिति ॥ देवीपुराणे ॥
ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमंत्रणं ॥ सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनं ॥ पूर्वाषाढायुता
ष्टम्यां पूजाहोमाद्युपोषणं ॥ उत्तरेण नवम्यां तु बलिभिः पूजयेच्छिवां ॥ श्रवणेन दशम्यां तु प्रणिपत्य विसर्ज
येदिति ॥ अत्र तत्र तिथीनां तत्तन्नक्षत्रयोगः संभवे [illegible]कृतौ तिथ्यायोग्यः कृतस्त्वाद्वाहरणीयः ॥ तद्योगे ॥ मूला
भावे तु सप्तम्यां केवलायां प्रवेशयेत् ॥ तथा तिथ्यंतरेषु गम्य[illegible]यः ॥ रेवलः ॥ तिथिनक्षत्रयो
योगे द्वयोरेवानुपालनं ॥ योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणीति ॥ सप्तम्यादिपक्षो भविष्ये ॥ प्रते
प्रपूजयेद्देवीं सप्तम्यादिदिनत्रयमिति ॥ त[illegible]रेपि ॥ त्रिरात्रं चापि कर्तव्यं सप्तम्यादि यथाक्रममिति ॥ अ
ष्टमीनवम्योर्द्विवासपूजनेन कर्तव्यं ॥ अष्टम्यां च नवम्यां च जगन्मातरमंबिकां ॥ पूजयित्वाश्विने मासि विशो
शोको जायते नरः इति [illegible]नात् ॥ केवलाष्टमीपूजने [illegible]प्राप्त्यं ॥ तेनाष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ॥
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ॥ अतोर्थं पूजनीया सा तस्मिन्नहनि मानवैः ॥ उपोषितैर्धूप

॥२६॥
दु॰

२ये

पवित्रैर्माल्यानुलेपनैरिति ॥ अयं च केवलाष्टम्युपवासः पुत्रवतो निषिद्धः ॥ उपवासं महाष्टम्यां पुत्रवा
न्न समाचरेत् ॥ यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेदिति कालिकापुराणात् ॥ केवलनवमीपूजा तु
विधेः ॥ उग्रचण्डाभिषेका वरदा शुद्धहेतवे [illegible] ॥ तस्मात्सा तत्र संपूज्या नवम्यां चण्डिका बुधैरिति ॥ उप
वासोप्यस्यामुक्तः ॥ तस्मादियं महापुण्या नवमी पापनाशिनी ॥ उपोष्या तु प्रयत्नेन सततं सर्वपार्थि
वैरिति ॥ पत्रिकापूजने ॥ आश्विनस्य कृष्णनवम्यां बोधनासामर्थ्ये नवरात्रांतर्गतषष्ठ्यां तत्कर्तव्यं ॥ षष्ठ्यां
बिल्वतरौ बोधं संध्यासु कारयेदिति भविष्यपुराणात् ॥ अत एव षष्ठी सायंसंध्याव्यापिनी ग्राह्या ॥ अभि
मंत्रणं तु पत्रीप्रवेशाव्यवहितपूर्वदिने कार्यं ॥ तदुक्तं [illegible] ॥ पत्रीप्रवेशात्पूर्वेद्युः सायाह्ने बिल्ववासिनीं ॥ वं
दीमामंत्रयेद्विद्वान् ॥ अत्र षष्ठी पुरस्त्रियेति ॥ मात्स्ये [illegible] सप्तम्यामथवा षष्ठी सायंकाले भवेत् ॥ सायमेव तथा
बिल्वमाहृत्याभिमंत्रणं ॥ पूर्वेद्युरेव षष्ठी सप्तम्यां सायं प्राप्तामपि त्यजेत् ॥ यद्यत्र पत्रिकापूजा न पर्येषु विधा
ति ॥ सन्निहितेषु यत्र सर्वपत्रिकादिवसस्य तु ॥ तद्दिनेष्वपरेद्युर्वा पत्रिका प्रवेशयेदिति ॥ पत्रिकापूजाया
सप्तम्यादिदिनत्रयं ॥ प्रातःकालीनमुक्तं तत्र तिथिविद्धं [illegible] ॥ भगवत्याः प्रवेशादि विसर्गान्ताश्च
याः क्रियाः ॥ तिथावुदयगामिन्यां सर्वास्ताः कारयेद्बुध इति नंदिकेश्वरपुराणात् ॥ अष्टमी तु पत्रिप्र
वेशतिथिवत् देवीपूजने नवमीविद्धा ग्राह्या ॥ [illegible] युग्मवाक्यात् ॥ [illegible] महाष्टमी पूज्या नव
मीसंयुता सदा ॥ सप्तमीसंयुता नित्यं शोकसंतापकारिणी ॥ सप्तमीशल्यसंयुक्तां मोहाद्दत्तानतो [illegible] ॥ पु
त्रदारधनं [illegible] नरकं प्रतिपद्यत इति ॥ [illegible] ॥ [illegible] सप्तमी श
[illegible] पूजनीया सदाष्टमी ॥ स्तोकापि सा तिथिः पुण्या यस्यां सूर्योदयो भवेत् ॥ दुर्गोत्सवे ॥ मत्स्येनापि

सा

नवे८

दु॰ ॥२८॥

संपूर्णा सप्तम्या त्याज्याष्टमी बुधैः ॥ लेशमात्रेण सप्तम्यां अपि स्याद्यदि दूषिता ॥ अतएव गौरीस्तु ती
स्या वदेव ॥ अत्र सप्तमीयोगेन त्याज्यत्वं ॥ अत्र स्यादपुत्रतरस्या ॥ [illegible] दृष्टं ॥ परात
पूर्वदिने नवमीस्पर्शोदयेन स्वल्पापि तिनदाष्टमी सप्तमीविद्धवर्ज्या स्या ॥ परदिने स्यादुदयेन स्यान्नवमीयो
पूर्वेह्नि ॥ तदाष्टमी प्रकुर्वीत सप्तम्यां लाहितां स्येति स्मृतिसंग्रहात् ॥ तथाच ॥ अहं भद्रस्त्वभद्रश्च ना
नयोरन्तरं कथितं ॥ तस्यां दिवसप्तमी कार्यं दुर्गाष्टमीति विधि दिश्यादीनि निश्चयेनान्येतद्विषयाण्येव ॥ इय
द्वे मौ वै तिथ्रस्य स्ता ॥ अष्टम्यां तु दिने सुयोदिनां तेन नवमीश्रितं ॥ कुजवारो भवेत्तत्र पूजनीयाः प्रय
ले तां विमहत्वे स्वच्छ तवेनात् ॥ अत्र विशेषेण पूजा कार्या पुनः पूजां तथाष्टम्यां विशेषेण समाच
रेत् ॥ जागरं च स्वयं कुर्याद्बलिदानं महानिशीथे इति कालिकापुराणात् ॥ तथा ॥ पशुघातः प्रकर्त्तव्यो
नवम्यां जेय धूस्तया ॥ तथा ॥ देवीतत्र पूजायेत् त्र्यष्टम्यां तु च ॥ घातयेत् पशून् भक्त्या ते भवति
महाबलाः ॥ बलिं च ये प्रयच्छन्ति सर्वभूतविनाशिने ॥ तेषां तु तुष्यते देवी पुत्रत्वं तु रणाकरमिति ॥
कृत्स्नं च बलिदानं भद्रकालीमायपशुहिंसान्यायेन धर्म्यमपि [illegible] त्रिया दिपरमेवा ॥ ब्राह्मणस्य तु ॥ सा
त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः रितीयमेव पूजा भवति ॥ तस्य सात्विककर्मस्वेवाधिका
रत्वेन भगवतीतोदिष्टुः प्राप्ति कृत्वात् ॥ एतदुक्तं देवीपुराणे ॥ तद्दूया मुनिर्नीमोषतिजेयार्थं निपोत्तम ॥ प
वो व द हणे पि ताधं पशुं पश्लन् ग विलं ॥ विधिवत्कौलिकालीति न [illegible] नघातयेदिति ॥ एवं सुरया

॥२८॥
रली॰

गात्ररुधिरेण च पूजा ब्राह्मणस्य न भवति ॥ स्वगात्ररुधिरं दत्वा ब्रह्महत्यामवाप्नुयात् ॥ मद्यं दत्वा
ब्राह्मणस्तु ब्राह्मण्यादेव हीयत इति कालिकापुराणात् ॥ माषभक्तादिना तु बलिदानं ब्राह्मणस्य
इति ॥ माषकुल्माषमांसापूपैर्दधि दुग्ध बलिर्निस्रो ॥ कूष्माण्डमिक्षुदण्डं च मद्यमासवमेव च ॥ एते बलि
समाः प्रोक्ताः तृप्तौ छागसमाः स्मृताः इति कालिकापुराणात् ॥ हृद्या मद्ये छागाभावे तु कूष्माण्डं श्रीफलं वा
मनोहरं ॥ वस्त्रसंवेष्टितं हत्वा छागं दये पशु हि कल्पितेति ॥ होमस्तु पूर्वाषाढायुतायामष्टम्यां पूजा होमादि प्र
योषणापि स्यादष्टम्यां ॥ नवम्यां बलिदानं च कर्तव्यं वै यथाविधि ॥ जपं होमं च विधिवत्कुर्यात्तत्र विभूतये
इति नवम्यां विधानात् ॥ शिष्टसंप्रदायश्च ॥ अष्टम्या पारयेत् नवम्यां स पापनीयो नवम्यामेव वा कार्यः ॥
होमप्रकं तु चात्यंतिला हि ॥ पूजयेत्तिलहोमैश्च [illegible] दिव्यैः सीरघृतादिभिरिति देवीपुराणात् ॥ मंत्रश्च जयंती
दि ॥ अनेनैव तु मंत्रेण जपहोमादिकारयेदिति देवीपुराणात् ॥ क्वचित्तु मार्कंडेयपुराणगतसप्तशती
स्तवेन प्रतिश्लोकं स्वाहाकारांतेन तिलसर्पिर्मिश्रपायसेन होमं कुर्वन्ति ॥ प्रतिश्लोकं च जुहुयात्
पायसं तिलसर्पिर्बीते रहस्याद्युत्तरत्वे च मंत्रसम्पाणमपप्नुयादिति ॥ रहस्यादि प्रधानाद्यपदुहिषं
पायसाज्य तिलास्तथा ॥ कुंदुः केसरकर्पूरैश्च [illegible] विचकिरैस्तथा ॥ पंचमेवा श्रीपुष्प [illegible] नानावि
फलैस्तथा ॥ इन्धनैश्चंदनस्तत्र गुग्गुलैश्च मनोहरैः ॥ प्रतिश्लोकं च जुहुयात् सर्व द्रव्याणि चक्रमादि
ति ॥ ॥ इति महाष्टमी ॥ ॥ अथ नवमी ॥ ॥ सा च अष्टमीविद्धा ग्राह्या ॥ युग्मवाक्यात् ॥ श्रावणी दुर्गा

दु०
॥२८॥

धि

नवमी तथा पूर्वाष्टमीन्वया ॥ पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनमिति ब्रह्मयमवचनाच्च ॥ तथा ॥ आ
श्वयुक्शुक्लपक्षे याष्टमी मूलेन संयुता ॥ सा महानवमी प्रोक्तेति अस्यां पूजाहोमादि हुत्वा प्रभाते बलि
नं कार्यं ॥ प्रभाते बलिदानं नवम्यां विधिवच्चरेदिति कालिकापुराणात् ॥ यत्त्वष्टमी नवमीविद्धा ग्राह्या द्विती
यदिनेपि क्रियती भवति तन्नवमीप्रयुक्तस्य पूजादेः पूर्वदिने तु कृतेपि महाबलिदानमात्रं द्वितीय
दिने कर्त्तव्यं ॥ अष्टम्यामुदिते सूर्ये [illegible] नौ तेन नवमी भवेत् ॥ प्रभाते बलिदाने तु कुर्यान्मात्रापि लभ्यते ॥ न
वम्यां तत्र संपूज्या दुर्गा दुर्गार्त्तिनाशिनी इति वचनात् ॥ अत्र पूजा बलिदानरूपैव ॥ सूर्योदये परे दिनो
पूर्णा स्यादपरा यदि ॥ बलिदानं प्रकर्त्तव्यं तत्र देव्याः शुभावहं ॥ बलिदाने कृतेष्टम्यां राष्ट्रभंगो भवेन्नृपेति
देवीपुराणात् ॥ इयं च बलिदानं नवमीप्रयुक्तं ॥ अष्टमीप्रयुक्तस्य तत्रैव कर्त्तव्यत्वात् ॥ द्वितीयदिने नवम्या
अलाभे तु पूर्वेद्युरेव नवमीमध्ये कार्यं ॥ दशम्यां बलिदानं तु दीयते यत्र मानवैः ॥ तस्य राष्ट्रं नाशमाया
ति परकोपद्रवैः स्फुटमिति भविष्ये नवमीप्रयुक्तस्य बलिदानस्य दशम्यां करणे दोषश्रवणात् ॥ ए
वं च नवम्यां सोपवासकुमारीपूजनब्राह्मणभोजनादि हिरण्यां दक्षिणामाचार्याय दद्यात् ॥ नवम्यां पर्वविस्तर
ज्ञो कर्त्तव्या इति विकृता ॥ दक्षिणां वस्त्रयुग्मं च आचार्याय निवेदयेदिति मत्स्यसूक्तात् ॥ वि
सर्जनं दशम्यामेव कार्यं ॥ संपूज्य प्रेषणं कुर्याद्दशम्यां शाबरोत्सवैरिति कालिकापुराणात् ॥ पार
णस्यापि विनियमत्स्यागरूपस्य विसर्जनोत्तरकालत्वात्तदपि विसर्जनोत्तरं दशम्यामेव कर्त्तव्यं ॥ अ

॥२८॥
१०

तत एव हेमाद्रौ धौम्यवचनं नवमीपर्यंतं व्रतमुक्तं ॥ आश्विने शुक्लपक्षे तु कर्त्तव्यं नवरात्रकं ॥ प्रतिपदा
दिक्रमेणैव यावच्च नवमी भवेदिति ॥ नवमीतिथिपर्यंतं वृद्ध्या पूजादिकमिति च ॥ एवं च विंध्यवासि
न्यां नवरात्रोपवासतः इति भविष्योत्तरात् ॥ यत्तु ॥ आश्विने शुक्लपक्षे तु नवरात्रमुपोषितः ॥ नव
म्यां पारणं कुर्याद्दशमीमिश्रिता न चेति दिवोदासनाम्ना केदिनेलिखितमिति वचनं तद्दनाकरे ॥ सा
करस्वल्लीहोभिसौकरि[illegible]वत स्याष्टमीपर्यंतोक्तेः ॥ अत्रे सूतकाले पारणा कार्येत्युक्तं दशम्या
मेव ॥ सूतके पारणं कुर्यान्नवम्यां होमपूर्वकं ॥ ततस्तु भोजयेद्विप्रान्दानं दद्याच्च शक्तितः इति ॥
अंगिरास्तु न कार्यमित्याह ॥ नियमस्थो यदा नारी प्रपश्येद्दतरा रजः ॥ उपोष्यैव तु ता रात्रिः
स्नाता शेषं चरेद्व्रतमिति ॥ अन्यत्रापि ॥ नियमस्था व्रतस्था च रजः पश्येत्कथंचन ॥ त्रिरा
त्रं तु क्षपयेदूर्ध्वं व्रतशेषं समापयेदिति ॥ अत्राशौचग्रहणं रजोग्रहणं चोपलक्षणं ॥ एवं चा
चारतो व्यवस्थेति केचित् ॥ सर्वेषामेषां निर्मलतावोर्काल्पशीघ्रतवरात्रापि सूतकमध्ये
पारणं कर्त्तव्यमित्यन्ये ॥ मम तु प्रतिभाति ॥ अत्र नवरात्रव्रते होमस्य पूजाङ्गत्वेन प्रधानत्वा
दनन्यसाध्यत्वेन तु दानार्चनं जपमिति निषेधाच्च ॥ शौचे असंभवान्न तत्समाप्तिर्विना नि
यमपल्पोपवाससमाप्त्ययोगात् [illegible] शौचान्ते होमादिपूर्वकं पारणं कर्त्तव्यमिति ॥ प्राचीनग्रंथि
स्थाचारोप्येवमेव ॥ प्रतिमापूजाविधिश्चान्यत्र महत्तो द्रष्टव्यः ॥ विस्तरभयान्न लिख्यते ॥

हि॰
॥२५॥

वि॰

॥ ॥ इत्येव विजयादशमी ॥ ॥ इदं चैव यदि [illegible] तदैव ॥ अथ पुनः तदैवोक्तं ॥ इत्येषा दशमी किंतु संप
र्णा कार्या यदि ॥ श्रवणर्क्षयुता कार्या सा तिथिर्विजयाभिधा ॥ श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थि
तो यतः ॥ उल्लंघयेयुः सीमानं तद्दिनर्क्षे ततो नरा इति कश्यपवचनात् ॥ संपूर्णैकादशी तिस्मि
न्नात्राकर्मकालव्यापिनी तु विनापि स्मृता ॥ अपराह्णव्यापी सर्वपक्षेषु पूर्वा ॥ दशम्यां तु नरैः सम्यक् पू
जनीयापराजिता ॥ दशमी दिने मा [illegible] रणे प्रयाणे वा [illegible] स्वकर्मसिद्धि [illegible] भि
र्मात ॥ अपराजिता ॥ अथातः प्रस्थाने व्याख्यास्यामः स्वादिना गोपथब्राह्मणोक्त प्रीत्यर्थं निक
[illegible] त्यात इत्युक्तप्रकारेण अपराजितापूजां कुर्यात् ॥ तत्प्रकार [illegible] मन्त्रः [illegible] ॥ सर्वैव ज
[illegible] स्या पूर्वापराह्णे तु दशमी दिने मा [illegible] सीमानमुल्लंघ्य अपराजितां पूजयेयुः ॥ [illegible] ॥ आ
श्विने शुक्ल [illegible] दशम्यां [illegible] अपराजितापूजां करिष्य इति संकल्प्य इति [illegible] दिक् [illegible]
[illegible] मध्ये अपराजितायै नमः अपराजितां [illegible] ततः [illegible] तस्यै नमः इति जयां त
[illegible] मायेन ततः विजयायै [illegible] अपराजितायै नमः [illegible] विजयायै नमः [illegible]
[illegible] इत्यादि [illegible] यथा [illegible] विसर्जयेयुः ॥ ॥ [illegible] ॥ शमी [illegible] अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च
[illegible] दुःस्वप्ननाशिनीं धन्यां प्रपद्येऽहं शमीं शुभाम् ॥ शमी शमयते पापं शमी लोहितकण्टका ॥ धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी ॥ करिष्यमाणयात्रायां यथाकालं सुखं
मया ॥ तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते इति ॥ [illegible] शमी [illegible] शमीम [illegible]

श्लोहित

शमनी

॥२५॥

तां गृहं ॥ गीतवादित्रघोषैस्तामानयेत्स्वगृहं प्रति ॥ ततो भूषणवस्त्रादि धारयेत्स्वजनैः सह इति
ज्योतिषे ॥ [illegible] नीराजनं राजा बलवृद्धौ यथाक्रमं ॥ शोभनं स्वजनं [illegible] इति
चाहिति ॥ ॥ इति विजयादशमी ॥ ॥ आश्विनशुक्ले कार्तिकस्नानारंभः [illegible] ॥ पाद्मे का
र्तिकमाहात्म्ये ॥ आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ॥ कार्तिकस्य व्रतानि स्याद्वै
प्रारभेत्तु धीरिति विष्णुनामां तु ॥ तु लासंक्रान्तिमारभ्य कर्तव्यमित्युक्तं ॥ तुलामकरमेषेषु प्रातःस्ना
यी सदा भवेत् ॥ हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति ॥ पूर्णिमायां युजे मासि पूर्णमास्यां स
माहितः [illegible] मासे समग्रं परयाव [illegible] समाप्यते कार्तिके पौर्णिमायां स्यादिति हेमाद्रि लि
खितम् ॥ दिपुराणे पूर्णिमान्तप्रमाणं ॥ कौमी [illegible] मासं समातपञ्च सादृते य समवाप्यते ॥ तत्का
र्तिके पंचनदे स्नानेनैवाप्यते ॥ कार्तिके विहितौ येयो [illegible] यपरायणः ॥ स्नानस्य
तु दिले भानौ भानुजाते स्याभीः कृतइति ॥ स्नानमन्त्रः ॥ कार्तिकेहं करिष्यामि प्रातःस्ना
नं जनार्दन ॥ प्रीत्यर्थं तव देवेश दामोदर मया सह इति ॥ अर्घ्यमन्त्रः कौमी [illegible] ॥ व्रतिनः कार्ति
के मासि स्नातस्य विधिवन्मम ॥ गृहाणार्घ्यं मया दत्तं दनुजेन्द्रनिषूदन ॥ नित्ये नैमित्तिके कृष्ण
कार्तिके पापनाशने ॥ गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥ एभो मन्त्रो समुद्भाय यन
[illegible] वार्घ्यं प्रयच्छति ॥ सुवर्णरत्नपुष्पाद्युपूर्णे तेन पुण्यवान् ॥ सुवर्णरत्नपुष्प [illegible] तेन स्नानस

हृ॰ ॥गृ॰ ॥ नारायणस्याग्रे पंचनदे प्रहस्नानात्तु कार्तिके ॥ अमी ते पुण्यवपुषः पुण्यभाजोऽतिनिर्मलाइति

न्तायहरति ॥ संपूर्णस्नानाशक्तौ त्र स्कपुराणे कार्तिकमधिकृत्य ॥ एकादश्यादिषु ॥ तथाग्रे

३दिने पंचसु रात्रिषु ॥ दिनेनैव स्नानमेवं सीतलासु नदीषु च ॥ [illegible] जितमात्तथा हि सा मांसभक्षणपं

देवेति ॥ तत्रैव ॥ कार्तिके मासि ये प्रातःस्नायी : [illegible] ता प्रकीर्तितास्ते : ॥ विष्णुतीर्थयुतस्नानैसं

संप्राप्तिर्नकृत ॥ पाद्मे ॥ कार्तिके चार्चितो येन कमलैः कमलेक्षणः ॥ जन्मकोटिषु विप्रें

द्र नैतेषां कमला गृहे ॥ नारसिंहे ॥ विहाय सर्वपुष्पाणि मुनिपुष्पेण केशवं ॥ कार्तिके योर्चये

द्भक्त्या वाजपेयफलं लभेत ॥ पाद्मे ॥ तुलसीदललक्षेण कार्तिके योर्चयेद्धरिं ॥ पत्रे पत्रे मुनि

श्रेष्ठ लभते मौक्तिकफलं ॥ स्कांदे ॥ निवेद्य केशवे मालां तुलसीकाष्ठसंभवां ॥ वहते यो न

रो भक्त्या तस्य नैवास्ति पातकं ॥ विष्णुधर्मे ॥ स्कंधे तु यानि लोमानि धात्रीमालाभृतो नृ

४वं णां ॥ तावद्वर्षसहस्राणि वैकुंठे वसतिर्भवेत ॥ मालायुग्मं तु यो बिभ्रेत् धात्रीतुलसिसंभवं ॥

वहते कंठदेशे तु कल्पकोटिं दिवं वसेत् ॥ तुलसीकाष्ठसंभूते माले कृष्णजनप्रिये ॥ बिभर्मि त्वा

महं कंठे कुरु मां हरिवल्लभं ॥ एवं संप्रार्थ्य विधिना मालां कृष्णगलेर्पितां ॥ धारयेत्कार्ति

२स के यो वै गच्छेद्वैष्णवं पदं ॥ स्कांदे ॥ धात्रीछायां तु यः कुर्यात्पिंडदानं महामुने ॥ मुक्तिं प्रयांति

पितरः प्रसादान्माधवस्य तु ॥ धात्रीफलविलिप्तांगो धात्रीफलविभूषितः ॥ धात्रीफल गृ॰ १०

लालाहारो नरो नारायणो भवेत ॥ धात्रीछायां समाश्रित्य योर्चयेच्चक्रपाणिनं ॥ पुष्पे पुष्पेऽश्व

मेधस्य फलं प्राप्नोति मानवः ॥ तथा ॥ कार्तिके वर्जयेत्तद्वद्द्विदलं बहुबीजकं ॥ माषमुद्गमसू

राश्चैव चणकाश्च कुलत्थकाः ॥ निष्पावा राजमाषाश्च आढक्यो द्विदलं स्मृतं ॥ एतान्यपि विजी

र्णानि सर्वाण्येतानि वर्जयेत् ॥ नारदीये ॥ कार्तिके वर्जयेत्तैलं कार्तिके वर्जयेन्मधु ॥ कार्तिके व

र्जयेत्कांस्यं कार्तिके शुक्तसंधितं ॥ तथा ॥ कार्तिके [illegible] सेवीयः प्राजापत्यपरोपि वा ॥ एकां

तरोपवासी वा त्रिरात्रोपोषितोपि वा ॥ षड्द्वादशरात्रपक्षं वा मासमेव वरवर्णिनी ॥ एकभक्तेन नक्तेन वाद

तथैवायाचितेन च ॥ उपवासेन भैक्षेण व्रजते परमं पदं ॥ काशीखंडे ॥ ऊर्जे यवान्नमश्नीयादेकान्नमथवा पुनः ॥ वृंता

कं सूरणं चैव शूकशिंबीश्च वर्जयेत ॥ नारदीये ॥ अव्रतेन क्षयेद्यस्तु मासं दामोदरप्रियं ॥ तिर्यग्योनि

मवाप्नोति नात्र कार्या विचारणा ॥ निर्णयामृते पुष्करे ॥ तुलायां तिलतैलेन सायंकाले समागते ॥ आ

काशदीपं यो दद्यान्मासमेकं हरिं प्रति ॥ महतीं श्रियमाप्नोति रूपसौभाग्यसंपदं ॥ तद्विधिर्[illegible] आ

दित्यपुराणे ॥ दिवाकरे स्ताभिगते तु मौलिभृतेऽग्रहाद्दूरं पुरुषप्रमाणं ॥ यवार्धतिर्यग् [illegible] तियवच्छ्रदा

रूमारोप्य [illegible] मावधतस्य मध्ये ॥ पवांगुलच्छिद्रयुतास्तुलस्त्रीं [illegible] दीर्घास्तोश्च [illegible] कास्तो

दशान्वत [illegible] द्वादशाहारतीस्तु [illegible] द्वादशानुलारी ॥ तत्कार्तिकायां तु महाप्रकाशो दीपः प्रये

योदलास्त्याष्टौ ॥ निवेद्यवमायहराय [illegible] दामोदरायाप्यधर्मदाहो ॥ प्रजा

९०
गा॰मा॰

पतिभ्यश्च स्वयसंक्षिप्त्वभ्यः प्रेतेभ्यश्च स्वधा घृतमक्षितेभ्य इति॥ ॥आश्विनपौर्णमास्यां कोजागरव्रतं नारायणवृत्ते॥
आश्विने पौर्णमास्यां तु चरेज्जागरणं निशि॥ कौमुदी सा समाख्याता कार्या लोकविभूतये॥ कौमुद्यां पूजयेल्लक्ष्मी-
मिंद्रमैरावतस्थितं॥ सुगंधिर्निशि सद्वेषो ह्यक्षैर्जागरणं चरेत्॥ निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी॥
तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः॥ नारिकेलैश्च पिष्टकैः पितृदेवान्समर्च्य च॥ बंधूंश्च प्रीणयेदन्नेन स्व-
यं तदशनो भवेदिति॥ मदनरत्ने॥ नारिकेलोदकं पीत्वा अक्षैर्जागरणं निशि॥ तस्मै वित्तं प्रयच्छामि को जागर्ति
महीतल इति॥ ॥अत्रैवाश्वयुजीकर्माहाश्वलायनः॥ आश्वयुज्यामाश्वयुजीकर्मेति॥ अत्रैव व्रीह्याग्रयणं॥ इदं च
आपराह्णिके कार्यमित्याद्यन्यत्र द्रष्टव्यं॥ अस्याकरणे प्रायश्चित्तमाह कारिकायां॥ अकृताग्रयणोऽश्नी-
यान्नं वान्नं यदि वै नरः॥ वैश्वानरं चरुं कृत्वा पूर्णाहुतिं स्रुवेणेति॥ ॥इत्याश्विनकृत्यं॥ ॥कार्तिककृष्णचतुर्थी कर-
कचतुर्थी॥ सा चंद्रोदयव्यापिनी ग्राह्या॥ दिनद्वये तद्व्याप्तौ पूर्वा॥ कार्तिककृष्णाष्टमी करकाभिधा मह्या-
द्रदेशेषु प्रसिद्धा॥ सापि चंद्रोदयव्यापिनी ग्राह्या॥ दिनद्वये तथात्वे पूर्वा॥ कार्तिककृष्णद्वादश्यां गोवत्सद्वादशी-
व्रतं॥ तत्र प्रदोषव्यापिन्या कार्या॥ नरो वा यदि वा नारी नक्तं सैकं भक्तं चैतस्मिन्पत्रके माषान्नं कामतोऽश्नीयाद्गोत्रि-
तमत्सरः॥ तस्यं तेच नक्तभोजनविधानात्॥ प्रतीक्ष्यैतागमं भक्त्या गवां गोध्यानतत्पर इति॥ गोष्ठागतां सुसंध्यायां गो-
रजोविधानात् बुधैर्नंदयेत्प्रेतेषु युग्मनास्यालि॥ वत्सयुक्तां ताम्रवराभिरैताः शरीरे विघ्नातिः प्रसराश्च वचनेनोत्तरवि- अनि
धानिषेधात्पूर्वविद्धा ग्राह्या॥ तत्र कर्तव्यमुक्तं भविष्योत्तरे॥ सवत्सां तुल्यवर्णां च शालिनीं गां पयस्विनीं॥ चंदनादिभिरा-
लिप्य पुष्पमालाभिरर्चयेत्॥ अर्घ्यं ताम्रमये पात्रे दत्वा पुष्पाक्षतैस्तिलैः॥ गंधदनैः कुंकुमैर्गन्धैः पुष्पैः कालोद्भवैस्त-

गा॰मा॰
९०

था॥ पादमूले तु दद्यात् मंत्रेणानेन पांडव॥ मातारुद्राणामित्येष मंत्रः प्रोक्तो द्विजन्मनां॥ स्त्रीशूद्राणां तमत-
वाहोमंत्रोयं परिकीर्तितः॥ क्षीरोदार्णवसंभूते सुरासुरनमस्कृते॥ सर्वदेवमये मातर्गृहाणार्घ्यं नमोस्तु ते॥ इत्यर्घ्य-
तज्जलं पुण्यं साक्षतं मूर्ध्नि निक्षिपेत्॥ ततो माषादिसंसिद्धान् वटकांश्च निवेदयेत्॥ मंत्रः॥ सुरभि त्वं जगन्मातर्नित्यं वि-
ष्णुपदे स्थिते॥ सर्वदेवमये ग्रासं मया दत्तमिमं ग्रस॥ प्रार्थनामंत्रः॥ सर्वदेवमये देवि सर्वदेवैरलंकृते॥ मातर्ममाभिलषि-
तं सफलं कुरु नंदिनि॥ ततः॥ तद्दिने तापिकापक्वं स्थालीपक्वं युधिष्ठिर॥ गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेदिति॥ हेमाद्रौ ना-
गरेये॥ कार्तिकः खलु मासो वै सर्वदेवमयो महान्॥ तत्र कृष्णपक्षे विशेषेण तत्र पंचदिनानि तु॥ पुण्यानि तेषु यद्दत्तमक्षय्यं सर्व-
कामिकं॥ नारदः॥ आश्विने कृष्णपक्षे तु द्वादश्यादिषु पंचसु॥ तिथिषूक्तः पूर्वरात्रे नृणां नीराजनाविधिः॥ नीराजयेयु-
र्देवांश्च विप्रान्गाश्च तुरंगमान्॥ ज्येष्ठान् श्रेष्ठान् जघन्यांश्च मातृमुख्याश्च योषित इति॥ आश्विनग्रहणं मुख्यचांद्राभि-
प्रायेण॥ अमावास्यांतमासपक्षेण आश्विनपक्षे कृष्णत्रयोदश्यां यमोद्देशेन संध्याकाले बहिर्दीपदानं कार्यं॥ तदुक्तं
स्कांदे॥ आश्वकृष्णपक्षे तु त्रयोदश्यां निशामुखे॥ यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति॥ तत्र मंत्रः॥ मृत्युना पाशदंड-
५ह भ्यां कालेन श्यामया सह॥ त्रयोदश्यां दीपदानात्सूर्यजः प्रीयतामिति॥ कार्तिककृष्णचतुर्दश्यां प्रातरभ्यंगस्नानं कर्तव्यं॥ धनम
तदुक्तं भविष्योत्तरे॥ कार्तिके कृष्णपक्षे तु चतुर्दश्यामिनोदये॥ अवश्यमेव कर्तव्यं स्नानं नरकभीरुभिः॥ अपामार्गस्य
पत्राणि भ्रामयेच्छिरसोपरि॥ अमावास्यांतमासपक्षे नारदसंहितायामपि॥ इषासितचतुर्दश्यामिंदुक्षयतिथा-
वपि॥ ऊर्जादौ स्वातिसंयुक्ते तदा दीपावली भवेत्॥ तैले लक्ष्मीर्जले गंगा दीपावलितिथौ वसेत्॥ अलक्ष्मीपरिहा-
रार्थमभ्यंगस्नानमाचरेत्॥ इंदुक्षयविसंक्रांतौ वारे पाते दिनक्षये॥ तत्राभ्यंगमदोषाय प्रातः पापापनुत्तये इति॥ तत्र च-
तुर्दशी तावदभ्यंगे दिनोदयप्रातःशब्दाभ्यां समानार्थता प्रातःकालव्यापिनी ग्राह्या॥ क्वचित्तु नोदे-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०
॥२२॥

यद् इति पठितं॥ तत्संप्रवर्षि चैव॥ केचित्प्रायो दाक्षिणात्याचारसंवादी विधृदयर तिपाठः॥ ततश्चंद्रोदयकाले कार्यं स्नाने
मात्या॥ तत्र यामवैदिप्रातश्चंद्रोदये नावर्तते सा॥ रंजा सर्वदरस्येषु दीपदानं ते पुसमीचीनैव॥ यात नरै वृप्रातश्चंद्रोदये व
र्त्तेते तावत्येव समासात स्यां स्नानं यमतर्पणं च कार्यं॥ ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः॥ यमाय धर्मराजाय मृत्यवे चांत
काय च॥ वैवस्वताय कालाय सर्वभूतक्षयाय च॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने॥ वृकोदराय चित्राय चित्रगुप्ताय
५ग ते नमः इति भविष्योत्तरे॥ अभ्यंगस्नानानंतरं तु विधानात्॥ तस्य कालत्रिरोषानुक्तेश्च॥ यातु दिनद्वयेपि कालव्यापिनी त
स्यां पूर्वस्यां वा स्नानादि कार्यं॥ संपूर्णत्वात्॥ यथः दर्शक्रमानुरोधाच्च॥ यापि दिनद्वये कालास्पर्शिनी सापि पूर्वैव॥ स्वका
लादुत्तरः कालो गौणः पूर्वस्य कर्मणः इत्युक्तेर्गौणकालव्यापित्वात्॥ पूर्वविद्धचतुर्दश्यां कार्तिकस्य सितेतरे॥ प्रत्यूषस
मये स्नानं कुर्यात्तत्र प्रयत्नतः इति पृथ्वीचंद्रोदयधृतवचनाच्च स्नानं तु तत्काले सत्यामपि चतुर्दश्यां चंद्रोदयेव भवति॥ तिथ्यादौ
तु भवेद्यावानिशुत्तरतिथिक्षयप्रक्षेपेण गास्नात तत्र तिथेः सत्त्वात्॥ अत्र स्नानेनैव बीभत्सपुराणे॥ अपामार्गमथो
तुंबीप्रपुन्नाटमथापरं॥ भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै॥ तत्र मंत्रः॥ सीतालोष्ठसमायुक्त सकंटकदलान्वित॥
हर पापमपामार्ग भ्राम्यमाणः पुनः पुनरिति॥ मंत्रलिंगात् सीतालोष्ठस्यापि भ्रामणे साहित्यं॥ यमतर्पणं चोपवीतिना प्रा
५का चीनावीतिना वा नो कार्यं॥ यज्ञोपवीतिना कार्यं प्राचीनावीतिना यवा॥ देवत्वं च पितृत्वं च यमस्यास्ति द्विरूपतेति वचनात्॥ हेतत्किं
बलाद्गुक्कृष्णपक्षे तिलसहत्रितयं स्यादिरूपेणैव पित्र्यधर्मविकल्पोऽप्रष्टव्यः॥ हेमाद्रौ भविष्योत्तरे॥ इति स्नात्वाऽपरात्त व्यापि
पाः संपूज्यते यता॥ केचिदिति स्नात्वेत्यस्य स्थाने नरकाय प्रदातव्याः इति पठितं॥ नरकाय नरकासुरदैत्याय इति बहवः॥ धुर्वै दे३
मर॥ कार्येऽधिपद इति वत्स्रिवर्यप्रयोजनत्वे नव्याख्यातं॥ तत्रैव॥ ततः प्रदोषसमये दीपान्दद्यान्मनोरमान्॥ ब्रह्मादिकुटी
वारीणां भवनेषु मठेषु चैवेति॥ यदा पूर्वदिने प्रदोषे चतुर्दशी स्नानयोग्या चोत्तरदिने तदा पूर्वदिने प्रदो ॥२२॥
१०

दोषे दीपदानादि द्वयेपरेद्युः स्नानं कार्यं क्रमानुरोधेन कालबाधस्य न्याय्यत्वात्॥ ज्योतिर्ग्रंथे॥ तुलासंस्थे सहस्रां
शौ प्रदोषे भूतदर्शयोः॥ उल्काहस्ता नराः कुर्युः पितृणां मार्गदर्शनं॥ तत्रोल्काग्रहणे मंत्रः॥ शस्त्राहता शस्त्रहतानां च भूतान
भूतदर्शयोः॥ उज्ज्वलज्योतिषा देहं दहेयं व्योमवह्निना इति॥ तद्दाने॥ अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम॥ उज्ज्वल
ज्योतिषा दग्धास्ते यांतु परमां गतिं इति॥ तद्विसर्जने मंत्रः॥ यमलोकं परित्यज्य आगता ये महालये॥ उज्ज्वलज्योतिषा वर्त्म प्र
पश्यंतो व्रजंतु ते इति॥ अन्यत्रापि स्मृते हे मे॥ ततः प्रेतचतुर्दश्यां भोजयित्वा तपोधनान्॥ शैवान्विप्रान्धर्मपरान् शिवलोके महीयते॥
माषपत्रस्य शाकेन भुक्त्वा तत्र दिने नरः॥ प्रेतचतुर्दशीकाले सर्वपापैः प्रमुच्यते॥ नरके प्रेतचतुर्दश्यां यः कुर्याच्छिवतुष्टये॥ न
तस्य तु नरकेनापि प्राप्यते पुण्यमीदृशमिति॥ अमावास्यामपि प्रातरभ्यंगस्नानं कार्यं॥ एवं प्रभातसमये त्वमावास्यां नराधिप॥ स्ना
त्वा देवान्पितॄन्भक्त्या संपूज्याथ प्रणम्य च इति भविष्योत्तरात्॥ नारदेनापि तिथित्रये दीपावलीं वेनोक्तिनिर्णयाय तत्र तैले लक्ष्मी
दिस्यादिना भ्यंगस्नानं विहितं॥ पौष्करे॥ स्वातिस्थिते रवाविंदुर्यदि स्वातिगतो भवेत्॥ पंचत्वेयुदकस्नायी कृताभ्यंग
त विधिर्नरः॥ नीराजितो महालक्ष्मीमर्चयन् श्रियमश्नुते इति॥ अमाकर्तव्यं दीपदानं तु स्नात्वा तु पार्वणश्राद्धं पित्सुभिपा
र्यतो पराह्णसमये इति राजेंद्र स्यमध्ये दीपमालाकुले रम्ये विधस्तु ध्वांतसंचये॥ प्रदोषे दोषरहिते नारी स्त्रेहदोषा गमे शुभ
रस्रुभिधानात्॥ श्राद्धानंतरं केचिद्व्यापिनि तिथिपर्विपत्नीयते॥ श्राद्धदिने प्रदोषव्यापिन्यां तु स्यात्तत्संभवत्येव तत्रापि प्र
दा पूर्वे परे च प्रदोषव्यापिन्यमावास्या श्राद्धयोग्या चोद्दितीयदिने तदा पूर्वेद्युरेव प्रदोषे लक्ष्मीं संपूज्य दीपदानं कार्यं॥
दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात्॥ प्रदोषसमये लक्ष्मीं पूजयित्वा ततः क्रमात्॥ दीपवृक्षास्तथा कार्याः शक्त्या
देवगृहेषु चेत्यादिस्यपुराणे॥ तस्य प्रदोषकालत्वाभिधानात्॥ कालविरोधे क्रमस्यानादरणीयत्वात्॥ परमार्थत च-
स्तु स्वे काले प्राप्तस्य श्राद्धानुवादत्वात्क्रमस्याविधानमेव॥ औत्सर्गिकोस्तंडतिभेरवाप्रायो व्यवहारविषयत्वेन तत्त्व
प्राप्तत्वात्॥ परदिनेतु दिनद्वयेपि प्रदोषव्यापिन्यमावास्या तदिनपरा॥ युग्मवाक्यात्॥ केचित्तु

६०
॥श्री॥
२प

नीयो गोदर्शीस्य स्यात्कदाचन ॥ तदा विहाय सर्वेषुः परे किं सुखरात्रिकेति तिथितत्त्वोदाहृत ज्योतिर्निबन्धनात् ॥
लक्ष्मीपूजनं तु ॐ महालक्ष्म्यै नम इति नाममंत्रेण कार्यं पूजानंतरं प्रार्थना ॥ नमस्ते सर्वदेवानां वरदासि हरिप्रिया ॥
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनादिति ॥ तथा ॥ सुखरात्र्यां प्रदोषे तु कुबेरं पूजयेत्तिदे ॥ तत्र मंत्रः ॥ धन
दाय नमस्तुभ्यं निधिपद्माधिपाय च ॥ भवंतु त्वत्प्रसादान्मे धनधान्यादिसंपद इति ॥ दीपदाने मंत्रः ॥ अग्निर्ज्योतिर्र
विर्ज्योतिश्चंद्रो ज्योतिस्तथैव च ॥ उत्तमः सर्वज्योतीनां दीपोयं प्रतिगृह्यतामिति ॥ एवं दीपान्दत्वा दीपवृक्षांश्च कार
६ बु त्वा ब्राह्मणानन्यांश्च बुभुक्षितान्भोजयित्वा स्वयमलंकृतो बंधुभिः सह भुंजीत ॥ ब्राह्मणान्भोजयित्वादौ संभो
ज्य च बुभुक्षितान् ॥ अलंकृतेन भोक्तव्यं नववस्त्रेण शोभना ॥ स्निग्धैर्मुग्धैर्विदग्धैश्च निर्वृतैर्बांधवैः स
ह इत्यादित्यपुराणात् ॥ मदनरत्ने भविष्ये ॥ एवं गते निशीथे तु जने निद्रार्धलोचने ॥ तावन्नगरनारीभिस्तूर्यडिं
डिमवादनैः ॥ तूर्यडिंडिमवाद्यैरिति क्वचित्पाठः ॥ निःकास्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहांगणादिति ॥ अन्यद
पि सत्यं भविष्ये ॥ सुखरात्रेः प्रदोषः काले प्रदीपोज्वलितालये ॥ सबांधवः पूजनं च श्रेयसा कुलपालयार्चयेत् ॥ प्रदीपवं
दनं कार्यं लक्ष्मीवंदनहेतवे ॥ गौरीत्वनाक्षतैश्चैव दध्याद्यैरपि सर्वदा ॥ विश्वरूपस्य भार्यासि पद्मे पद्मालये शुभे ॥ महा
लक्ष्मी नमस्तुभ्यं सुखरात्रिं कुरुष्व मे ॥ वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतं ॥ सुखरात्रिप्रभाते तन्मे लक्ष्मी
र्व्यपोहतु ॥ या रात्रिः सर्वभूतानां या च देवेष्ववस्थिता ॥ संवत्सरप्रिया या च सा ममास्तु सुमंगला ॥ माता त्वं सर्व
तानां देवानां सृष्टिसंभवा ॥ आख्याता भूतले देवी सुखरात्रिर्नमोस्तु त इति ॥ एतदुत्तरप्रतिपद्यपि दीपावली सा
तत्राभ्यंगस्नानं द्यूतादि कर्तव्यं ॥ तथा चादित्यपुराणे ॥ शंकरस्तु पुरा द्यूतं ससर्ज सुमनोहरं ॥ कार्तिके शुक्लपक्षे
॥श्री॥
६०

तु प्रथमेहनि सत्यवान् ॥ जितश्च शंकरस्तत्र जयं लेभे च पार्वती ॥ अतोर्थाच्छंकरो दुःखी उमा नित्यं सुखोचिता ॥ त
स्माद्द्यूतं प्रकर्तव्यं प्रभाते तत्र मानवैः ॥ तस्मिन्द्यूते जयो यस्य तस्य संवत्सरं जयः ॥ पराजये विरुद्धं तु लब्धनाशस्ततो
भवेत् ॥ श्रोतव्यगीतवाद्यादि स्वनुलिप्तैः स्वलंकृतैः ॥ विशेषवच्च भोक्तव्यं प्रशस्तैर्बांधवैः सह ॥ तस्यां निशायां कर्तव्यं
शय्यास्थानं सुशोभनं ॥ गंधैर्वस्त्रैस्तथा पुष्पैः शस्तैर्माल्यैरलंकृतं ॥ दीपमालापरिक्षिप्तं तथा धूपेन धूपितं ॥ दयिताभि
श्च सहितैर्नेया सा तु भवेन्निशा ॥ नवैर्वस्त्रैश्च संपूज्या द्विजसंबंधिबांधवा इति ॥ भविष्योत्तरे ॥ यो यादृशेन भावेन तिष्ठत्य
स्यां युधिष्ठिर ॥ हर्षदैन्यादिरूपेण तस्य वर्षं प्रयाति हि ॥ रुदितो रोदिति वर्षं हृष्टो वर्षं प्रहृष्यति ॥ भुक्तो भोक्ता भवेद्वर्षं स्वस्थः स्व
स्थो भवेदिति ॥ तस्मात्प्रहृष्टैस्तुष्टैश्च कर्तव्या कौमुदी नरैः ॥ वैष्णवी दानवी चेयं तिथिः प्रोक्ता युधिष्ठिर ॥ तत्रैव ॥ लोकै[illegible]पि गृ
हस्यांतः शय्यायां शुक्लतंडुलैः ॥ संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत् ॥ बलिमुद्दिश्य दीयंते दानानि कुरुनंद
न ॥ यानि तान्यक्षयाण्याहुर्मयैतत्संप्रदर्शितमिति ॥ अत्र यद्यपि बलिपूजाकालविशेषो नोक्तस्तथापि राज
कर्तव्यतया सायाह्ने तद्धोम्ये वेह राज्ञो दैत्यपतेर्बलेः ॥ भूमौ कुर्याच्च सं[illegible]मो मंडलके कृते ॥ बलिमालिख्य
दैत्येंद्रं वर्णकैः पंचरंगकैः ॥ सर्वाभरणसंपन्नं विंध्यावल्या समन्वितं ॥ कूष्मांडबाणजंभोरुमुरदानवसंवृतं ॥ संपूर्ण
